सं.भा.प्र.सभायाः चत्वारिंशत्कुसुमम्

वाणी भवतु गैर्वाणीम्

संस्कृत-बोधिनी—३

(तृतीया भागः)

रचयिता

श्री. आ. वरदराजः

शिरोमणिः



प्रकाशिका

संस्कृतभाषाप्रचारिणी सभा

चित्तूर (आं.प्र.)

 [illegible] मूल्यम् रू. 25-00

सं.भा.प्र.सभायाः त्रयस्त्रिंशत्कुसुमम्

वाणीं भजत गैर्वाणीम्

संस्कृत-बोधिनी—३

(तृतीया भागः) विचक्षण परीक्षा

III - Paper

रचयिता
श्री. आ. वरदराजः I - paper
शिरोमणिः



प्रकाशिका
संस्कृतभाषाप्रचारिणी सभा
चित्तूरु (आं.प्र.)

सर्वस्वाम्यं सभाधीनम्] 2013 [मूल्यं रू. 25-00

विषयसूचिका



प्रस्तावना

भोः सहृदयाः पण्डिताः ! !

संस्कृत-सभायाः नूतन - पाठ्य - प्रणाली मनुसृत्य विचक्षण-परीक्षार्थिनां कृते संस्कृत-बोधिनी - ३ (तृतीया) विरचिता प्रकाशिता चाऽद्य । विचक्षणाभ्यर्थिनां संस्कृत-स्तरं विषय-परिज्ञानं च मनसि निधाय तदानु-गुण्येन भूगोळेतिहासादिविषयप्रधानान्, महापुरुषाणां जीवित विशेषान् पौरविज्ञानबोधकान्, संस्कृत-साहित्य सम्बन्धिन श्च पाठान् विलिख्य, देशभक्तिपूरितानि गेयानि संकलय्य, क्वचि त्किञ्चित्संगृह्य, आलोचनात्मकं निबन्धं निबद्धच-सर्वमिदं संयोज्य संस्कृतबोधिनी तृतीयेयं प्रकल्पिताऽस्ति । अन्ते पाठेषु प्रयुक्तानां मुख्यपदानां आंग्लार्थ श्च प्रदत्तः ।

केषाञ्चिदेव पठाना मत्र विशेषतोऽभ्यास-प्रकाराः प्रदत्ताः । गेयानां तु विशेष-दृष्टया सारांशाः प्रदत्ताः । अन्येषां पुन पाठानां केवल बहुलाः प्रश्नाः परं प्रदत्ताः । ये च विषय-परिज्ञानं स्पृशन्ति ।

पाठानां भाषागतशैल्याः द्वितीयानुबन्धपुरस्सरेण नातिक्लिष्टा नातिसुलभा च रीति रादृता । संस्कृत-प्रचारकबन्धवः परीक्षार्थिन श्च इमां तृतीयां संस्कृत-बोधिनीं सहृदयभावेन स्वीकुर्युरिति, स्खालित्यानि सदयं सूचयेयु रिति च विज्ञापयामः ।

इति
संस्कृतप्रचाराभिलाषी,
आ. वरदराजः, शिरोमणिः ।

विज्ञप्तिः



भोः पण्डितसहृदयाः! !

संस्कृतभाषाप्रचारिण्याः सभायाः विचक्षण परिक्षार्थिनां इतरेषां च संस्कृत-जिज्ञासूनां उपयोगार्थं संस्कृत-बोधिनी - ३ (तृतीया) सभया मुद्रापिता । एतद्वाचक-रचयित्रे कार्यवर्ग सदस्याय श्री आ. वरदराजमहाशयाय मनः पूर्विकां कृतज्ञतां निवेदयामः ।

इति विज्ञापकः,
प्रकाशकमन्त्री,
सं. भा. प्र. सभा, चित्तूरु ।

सेवां ते करवाणि ।

[गेय गैर्वाणीतः]

सेवां ते करवाणि, वाणि ।
सेवां ते करवाणि ।

कर्णाटान्ध्री - घन मिलिते ।
केरळ - द्रविड - निगूढयुते ।
हिन्दी मराठाद्यतिमहिते ।
संस्कृतनाम्ना प्रविचलते । ।। सेवां ते ।।

वाचा त्वा मभिनन्दामि ।
मत्या दृढ मभिनिविशामि ।
कृत्या त्वां परिसेवेऽहम् ।
भक्त्या भवतीं कलयेयम् । ।। सेवां ते ।।

त्वत्काव्यानि पठेयम् ।
त्वत्पद्यानि लिखेयम् ।
त्वच्छास्त्राणि विगाहे ।
त्वन्मृदुपदानि सेवे । ।। सेवां ते ।।

अभ्यासः

सारांशः – संस्कृतस्य सेवां कर्तुकाम एवं गायति – हेवाणि! गीर्वाणि!!
त्वं खलु सर्वत्र भारते व्याप्तासि! उत्तरभारते हिन्दीं -

मराठी – प्रभृतिभि र्भाषाभिः, दक्षिणभारते तेलुगु – कन्नड - तमिळ-मलयाळ - भाषाभि श्च साकं संस्कृतस्य महान् घनिष्ठ स्सम्बन्धोऽस्ति। भारते तादृशी भाषा न काप्यस्ति यस्या संस्कृतपदजालं नोपलभ्येत। अतः संस्कृतं भारते सर्वासा मपि भाषाणां मातृस्थानीया भवति। भारतीयविद्यार्थिनां इदं अन्यन्तावश्यकं यत् एकैकोऽपि विद्यार्थी, ऐकैकोऽपि विद्यार्थिनी संस्कृतसाहित्यं पठन् शास्त्रीयान् विषयांश्च जानीयात्।

वयं मनोवाक्कायैः तव सेवां करवाम।

प्रश्नाः – 1) संस्कृतस्य प्रशस्तिः कीदृशी?

2) अस्य गेयस्य सारांशः कः?

विवरणम् – 1) कर्णाटेन = कन्नडभाषया, आन्ध्र्या = आन्ध्रभाषया च घनं = सुष्ठु मिलिता।

2) केरळेन = मलयाळभाषया, द्राविडेन = तमिळभाषाया, निगूढ = सम्यक्, युता = संयुक्ता।

3) हिन्दी = हिण्दीभाषया, मराठादिना = महाराष्ट्रीय-प्रभृतिभिः भाषाभिश्च, अतिमहिता = विराजमाना।

विग्रहः – त्वत्काव्यानि = तव काव्यानि।

त्वत्पद्यानि = तव पद्यानि।

त्वच्छास्त्राणि = तव शास्त्राणि।

त्वन्मृदुपदानि = तव मृदूनि पदानि।

उत्तम पुरुष:

विध्यर्थक: –	ए. व.	द्वि. व.	ब. व.
	करवाणि	करवाव	करवाम
	कलयेयं	कलयेव	कलयम
	पठयम्	पठेव	पठेम
	लिखेयम्	लिखेव	लिखेम

वर्तमानकाल:

परस्मैपदी – (अभि) नन्दामि नन्दाव: नन्दाम:
(अभि) (नि) विशामि विशाव: विशाम:

आत्मनेपदी – (परि) सेवे सेवावहे सेवामहे
(वि) गाहे गाहावहे गाहामहे



महतां नाम्नैव संसिद्धिः

[पञ्चतन्त्रात्]

कस्मिंश्चिद्वने चतुर्दन्तो नाम महागजो यूथाधिपः प्रतिवसति स्म । तत्र कदाचिन्महत्यनावृष्टिः सञ्जाता प्रभूतवर्षाणि यावत् । तथा तटाक-ह्रद-पल्वल-सरांसि शोष मुपगतानि । अथ तैः समस्तगजैः स गजराजः प्रोक्तः — देव, पिपासाकुला गज-कलभा मृतप्रायाः, अपरे मृता श्च । तदन्विष्यतां कश्चित् जलाशयो यत्र जलपानेन स्वस्थतां व्रजन्ति । तत श्चिरं ध्यात्वा तेनाऽभिहितम् — "अस्ति महान् ह्रदो विविक्ते प्रदेशे स्थलमध्यगतः पातालगङ्गाजलेन सदैव पूर्णः । त त्तत्र गम्यताम्" इति । तथाऽनुष्ठिते पञ्चरात्र मुपसर्पद्भिः समासादित स्तैः स ह्रदः । तत्र स्वेच्छया जलमवगाह्य अस्तमय-वेलायां निष्क्रान्ताः ।

तस्य च ह्रदस्य समन्ताच्छशक-बिला असंख्या सुकोमल-भूमौ तिष्ठन्ति । तेऽपि समस्तै रपि तै र्गजै रितस्ततो भ्रमद्भिः परिभग्नाः । बहव श्शशका भग्न-पाद-शिरोग्रीवा विहिताः । केचि न्मृताः, केचिज्जीवशेषा जाताः ।

अथ गते तस्मिन् गजयूथे, शशकाः सोद्वेगा गज-पाद क्षुण्ण-समाश्वासाः, केचिद्भग्नपादः, अन्ये जर्जरित-कलेबरा रुधिरप्लुताः, अन्ये हतशिशवो बाष्पपिहितलोचनाः समेत्य मिथो मन्त्रं चक्रुः । — "अहो! विनष्टा वयम् । नित्य मेवैतद्गजयूथ मागमिष्यति, यतो नाऽन्यत्र जल मस्ति । तत् सर्वेषां नाशो भविष्यति । उक्तं च —

स्पृशन्नपि गजो हन्ति, जिघ्रन्नपि भुजङ्गमः ।
हसन्नपि नृपो हन्ति, मानयन्नपि दुर्जनः ॥

तच्चिन्त्यतां कश्चि दुपायः । तत्रैकः प्रोवाच—"गम्यतां देशत्यागेन । किं अन्यत्? उक्तं च मनुना व्यासेन च –

त्यजे देकं कुलस्यार्थे, ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ।

क्षेम्यां सस्यप्रदां नित्यं पशुवृद्धिकरी मपि ।
परित्यजे न्नृपो भूमि मात्मार्थ मविचारयन् ॥

आपदर्थे धनं रक्षे द्दारान् रक्षेद्धनै रपि ।
आत्मानं सततं रक्षे द्दारैरपि धनैरपि ॥

तत श्चान्ये प्रोचुः — "भोः । पितृ - पैतामहं स्थानं न शक्यते सहसा त्यक्तुम् । तत् क्रियतां तेषां कृते काचि द्विभीषिका, यत् कथमपि दैवान्न समायान्ति । उक्तं च –

निर्विषेणाऽपि सर्पेण कर्तव्या महती फटा ।
विषं भवतु वा माऽस्तु, फटाटोपो भयंकरः ॥

अथाऽन्ये प्रोचुः — "यद्येवं तत स्तेषां महद्विभीषिकास्थान मस्ति; येन नाऽऽगमिष्यन्ति । सा च चतुरदूतायत्ता विभीषिका, यतो विजयदत्तो नाम राजाऽस्म त्स्वामी शशक श्चन्द्रमण्डले निवसति । तत् प्रेष्यतां कश्चि न्मिथ्यादूतो यूथाधिपसकाशं, यच्चन्द्रस्त्वा मत्र ह्रद आगच्छन्तं निषेधयति; यतोऽस्मत्परिग्रहोऽस्य समन्ता द्वसति । एव मभिहिते श्रद्धेयवचनात् कदाऽपि निवर्तते ।

अथाऽन्ये प्रोचुः – "यद्येवं, त" दस्ति लम्बकर्णो नाम शशकः । स च वचन - रचना - चतुरो दूतकर्मज्ञः । स तत्र प्रेष्यताम् । उक्तं च —

साकारो निःस्पृहो वाग्मी नानाशास्त्रविचक्षणः ।
परचित्तावगन्ता च राज्ञो स इष्यते ॥

तदन्विष्यतां यद्यस्मा द्वसना दात्मनां सुनिर्मुक्तिः । "अथाऽन्ये प्रोचुः —" अहो! युक्त मेनत् । नाऽन्यः कश्चि दुपायोऽस्माकं जीवितस्य । तथैव क्रियताम् ॥

अथ लम्बकर्णो गजयूथाधिप-समीपे निरूपितो गत श्च । तथानुष्ठिते लम्बकर्णोऽपि गजमार्गं मासद्यागम्य

स्थल मारुह्य तं गज मुवाच — "भो भो! दुष्टगज! कि मेवं लीलया निश्शङ्कतयाऽत्र चन्द्रह्रदं आगच्छसि? तन्नागन्तव्यम्, निवर्त्यताम् इति ।" तदाकर्ण्य विस्मित-मना गज आह-"भोः । कस्त्वम्? "स आह अहं लम्बकर्णो नाम शशक श्चन्द्रमण्डले वसामि, साम्प्रतं भगवता चन्द्र-मसा तव पार्श्वे प्रहितो दूतः । जानात्येव भवान्, यथार्थ-वादिनो दूतस्य न दोषः करणीयः । दूतमुखा हि राजानः सर्व एव । उक्तं च –

उद्यनेष्वपि शास्त्रेषु बन्धुवर्गवधेष्वपि ।
परुषाण्यपि जल्पन्तो वध्या दूताः न भूभुजा ॥

तच्छ्रुत्वा स आह — "भोः शशक! तत्कथय भगवत श्चन्द्रमस स्सन्देश, येन सत्वरं क्रियते ।" स आह — "भवताऽतीत दिवसे यूथेन सहागच्छता प्रभूताः शशकाः निपातिताः । तत् किं न वेत्ति भवान्, यन्मम परिग्रहोऽ-यम्? तद्यदि जीवितेन ते प्रयोजनम्, तदा केनाऽपि प्रयोजनेनाऽत्र ह्रदे नागन्तव्य मिति सन्देशः । गज आह — "अथ क्व वर्तते भगवान् स्वामी चन्द्रः? स आह — "अत्र ह्रदे साम्प्रतं शशकाना भवद्यूथ-मर्भि-तानां हतशेषाणां समाश्वासनाय समायात स्तिष्ठति । अहं पुन स्तवान्तिकं प्रेषितः । गज आह — "यद्येवं तद्दर्शय मे तं स्वामिनं, येन प्रणम्यान्यत्र गच्छामि ।"

शशक आह — "भो! आगच्छ मया सहैकाकी येन दर्शयामि।" तथानुष्ठिते, शशको निशासमये तं गजं ह्रदतीरे नीत्वा जलमध्ये स्थितं चन्द्रबिम्ब मदर्शयत्। आह च — "भोः! एष नः स्वामी जलमध्ये समाधिस्थ स्तिष्ठति। तन्निभृतं प्रणस्य सत्वरं व्रज। नो चेत् समाधिभङ्गा द्भूयोऽपि प्रभूतं कोपं करिष्यति। अथ गजोऽपि त्रस्तमाना स्तं प्रणम्य पुन र्गमनाय प्रस्थितः। शशका श्च तद्दिना दारभ्य सपरिवाराः सुखेन स्वेषु स्थानेषु तिष्ठन्ति स्म।

अतोऽस्याः कथाया नीति स्तु –

व्यपदेशेन महतां सिद्धिः संजायते परा।
शशिनो व्यपदेशेन वसन्ति शशकाः सुखम्॥ इति॥

अभ्यासः

प्रश्नः – 1) गजराजः अन्यैः गजैः किमिति प्रोक्तः?
2) शशकाः समेत्य किमिति मिथो मन्त्रं चक्रुः?
3) अन्ये शशकाः किं प्रोचुः?
4) गजानां विभीषिका-स्थानं किमिति अन्यैः शशकैः प्रोक्तम्?
5) गजयूथाधिपसकाशं कः प्रेषितः? स कथम्भूतः?
6) लंबकर्णः गज प्रति किमुवाच?
7) गजः कुतः ह्रद परित्यज्य अन्यत्र प्रस्थितः?
8) हन्तारः के? ते कथं घ्नन्ति?

9) त्यागे कर्तव्ये उत्तरोत्तरं किं किं त्याज्यम्?

10) रक्षणे कर्तव्ये किं किं उत्तरोत्तर रक्षणीयम्?

11) फटाटोपो नाम कः? आत्मरक्षणे स कथ मुपयुज्यते?

12) दूतस्य लक्षणं कीदृशम?

13) महतां व्यपदेशेन कीदृशी सिद्धिः?

→ सपरिवाराः मुखेन स्थैव व्यालेषु तिष्ठन्ति

14) इमां कथां संक्षिप्य लिखत?

विग्रहः - 1) यूथस्य अधिपः (ष. त) 2) तटाक श्च हृदश्चां पल्वल श्च सरश्च (द्वन्द्वः) पातुं इच्छा, पिपासा तथा आकुलाः तृ त) गजस्य कलभाः (ष. त.) मृतवत् स्थिताः = मृतप्रायाः। शशकानां बिलां (ष. त.) असंख्याः = न संख्या येषां ते। भग्नाः पादाः शिरांसि ग्रीवा श्च येषां ते (बहुव्रीहिः) उद्वेगेन सह वर्तन्त इति = सोद्वेगाः। गजानां पादाः, तैः क्षुण्णाः सम वासाः येष ते (ब. व्री.) जर्जरितानि कळेबराणि येषां ते (ब. व्री.) रुधिरेण प्लुताः (तृ. त.) हताः शिशवो येषां ते (ब. वी) बाष्पैः पिहितानि लोचनानि येषां ते (ब. व्री.) पितु पितामहस्य चेदं = पितृ - पैतामहं (तद्धितान्तं) निर्गत विषं यस्मान्सः (ब. व्री.) कर्तु योग्या = कर्तव्या (कृदन्तं) चतुर श्चासौ दूत श्च कर्मधारयः) तस्मिन् आयत्ता (स.त.) अस्माक परिग्रहः (ष. त) श्रद्धायाः अर्हः = श्रद्धेयः, तस्य वचनम् (ष. त) वचनस्य रचना, तस्यां चतुरः। विस्मितं मनः यस्य सः (ब. व्री.) त्रस्त मनः यस्य सः (ब. वी.) परिवारेण सह वर्तन्त इति सपरिवाराः। त्वस्या सह (अव्ययीभावः)।

सन्धिः – कस्मिन + चित् = कस्मिश्चित्; कश्चित् + जलाशयः,
ततः + चिरं; सदा + एव (वृद्धिः) समन्तात् + शशकबिलाः
तत् + चिन्त्यतां, तत्र + एकः (वृद्धिः) प्र + उक्तः (गुणः)
देवात् + न, यदि + एवं (यणादेशः) तथा + एव (वृद्धिः)
तत् + श्रुत्वा = तच्छ्रुत्वा ।

धातवः—प्रतिवमति स्म-प्रत्यवसत् (भूतार्थे स्म वर्तमानक्रियायाः)
अदर्शयत् = दर्शयति स्म ।
विधिः—गम्यताम्, अन्विष्यतां, प्रेष्यतां, क्रियतां, चिन्त्यतां,
त्यजेत्, रक्षेत् कृदन्ताः वर्तव्या (न) आगन्तव्यम्

क्रियार्थाः कृदन्ताः –

कृदन्तः	क्रिया	कृदन्तः	क्रिया
संजाता	समाजायत	निष्क्रान्ताः	निश्चक्रमुः
उपगतानि	उपागच्छन्	विनष्टाः	व्यनशन
प्रोक्तः	प्रावाचि	कर्तव्या	क्रियेत
मृताः	अम्रियन्त	(न) आगन्तव्यं	(न) आगच्छेत्
समासादितः	समासाद्यते स्म		

प्रयोगः –

कर्तरि	कर्मणि	क्रियाः	कृदन्ताः
स अभिहितवान् ।	तेन अभिहितम् ।	चक्रुः	कृतवन्तः
ग्रामं त्यज्येत् ।	ग्रामः त्यज्येत ।	प्रोवाच	प्रोक्तवान्
आत्मानं सततं रक्षेत्।	आत्मा सततं रक्ष्येत ।	प्रोचुः	प्रोक्तवन्तः
उपायं चिन्तय ।	उपायः चिन्त्यताम् ।		
मनु रुक्तवान् ।	मनुना उक्तम् ।		
विभीषिकां कुरु ।	विभीषिका क्रियताम् ।		

Passive

तथैव कुरु ।	तथैव क्रियताम् ।
गजाः गजराजं प्रोक्तवन्तः।	गजैः गजराजः प्रोक्तः ।
मां प्रेषितवान ।	अहं प्रेषितः ।

असमापक क्रियाः –

क्त्वान्ताः	ल्यबन्ताः	शत्रन्ताः	शानजन्ताः	तुमुन्नन्ताः
ध्यात्वा	प्रणम्य	ध्यायन्	(नि) वर्तमानः	ध्यातुं
गाहित्वा	अवगाह्य	आगच्छन्	गाहमानः	गाहितुं
नीत्वा	समेत्य	जल्पन्		वक्तुं
श्रुत्वा	आरभ्य	भ्रमन्		त्यक्तुं
	आरुह्य			
	आसाद्य			
	आकर्ण्य			

सन्नन्ताः – पातुं इच्छा = पिपासा
ज्ञातुं इच्छा = जिज्ञासा



संस्कृतेतिहासः

इतिहासो नाम

"इति ह आस" – एवं हि आसीत् इति पुराकृतस्य "इतिहास" इति नाम सञ्जातम्। पुरातनानां पुरवृत्तानां च पुन रवलोकनं वर्तमानाया वर्तिष्यमाणाया श्च सन्ततेः पुरोगतौ अतीवोपकुरुते। अत एव ऐतिहासिका इतिहासग्रन्थान् प्रणयन्ति येन वर्तमाना स्समकालिका जनाः भविनी वा राष्ट्रीय-सन्ततिः ऐतिहासिकान् वृत्तान्तान् सतोऽसतो वा यथातथ मवगच्छेयुः। तत श्च स्वकीयं राष्ट्रीयं वा प्रवर्तनं जीवित-विधानं च समीचानं निरूपयेयुः। एवं रीत्या इतिहासस्य अध्येय-कोटौ (कोर्सस्) अत्यन्तप्रामुख्योपेतं विलक्षण स्थान परिकल्पितमस्ति।

देश-विदेशानां, तत्रत्य-जनमन स्स्वरूप-स्वभावानां, तत्र तत्र तै स्तै र्जनै र्व्यवह्रियमाणानां विविधानां भाषाणां एवमादीना मन्येषां विषयाणां च इतिहासाः कविभिः पण्डितै श्चैतिहासिकै र्बहुशो विलिखिता विलसन्त्यधुना। तत्र संस्कृतभाषायाः इतिहासो महत्तरं न चेन्महत्तम मेव वा स्थान मधिगतोऽस्ति। समस्ते भूमण्डले न तादृशी काचिद्भाषोपलभ्यते, या संस्कृता दपि पुरातनीं स्थितिं

प्रशस्तिञ्च प्राप्ता स्यात्। अत स्संस्कृतेतिहास: विश्वेतिहासमालायां मध्यमणिन्यायेन नायकायते।

संस्कृतविभाग: — आत्म-भाव-प्रकाशनार्थं समुद्गतानां भाषाणां अपेक्षाकृतं सार्वत्रिक सार्वकालिकं च प्रतिपादन सामर्थ्यं व्यवस्थापयितुं व्याकरणात्मकसंस्कार: प्रप्रथमं जगति यदि यस्या: कस्या श्चिद्भाषाया: कृत: स्या त्तर्हि सा काऽन्या संस्कृतादृते भवितु मर्हति? एव सम्प्रवृत्तस्य संस्कृतवाङ्मयस्य द्वे रूपे प्रख्याते स्त:। प्राचीन-नवीन-भेदेन प्रवृत्तयो स्तयो: प्रथम वैदिकञ्चेत् द्वितीयं लौकिकं भवति।

नामौचित्यं – प्राचीन भारत वर्षे वेद-साहित्य मेव प्रथमत: प्रादुर्भूतम्। "अनन्ता वै वेदा:" इति वेदराशि रानन्त्य मश्नुते। विद - ज्ञाने इति धातोर्निष्पन्नतया वेदशब्दस्य ज्ञान - विज्ञान - बोधकत्वं स्वतस्सिद्धम्। एवं वेदा अनन्ता अपि भगवता व्यासेन महर्षिणा चतुर्धा सगृहीता: संकलिता श्च ऋग्यजुस्सामाथर्वण नामभि: वेद-संहिता स्समभवन्। गुरुमुखत: श्रुतस्य अनूच्चारण-विधया शिष्यै स्सम्पादितस्य संगृहीतस्य च परम्परा प्राप्तस्य सुरक्षितस्य वेदराशे: श्रुतत्व मेव तस्य "श्रुतय" इति नामान्तर मकल्पयत्। आम्नाय:, छन्द:, स्वाध्याय: इत्यादयोऽपि वेदसंज्ञा: प्रसिद्धा स्सन्ति। ऋक्-ऋच:,

यजुः – यजूंषि, साम-सामानि इत्येकवचन-बहुवचनाभ्यां प्रसिद्धस्य प्रथम-वेदत्रयस्य "त्रयी" इत्यन्या समुदायसंज्ञा-प्यस्ति ।

स्वरूप विभाग विनियोगाः – प्राचीनार्या महर्षयः क्रतु परायणा आसन् । क्रतुषु ऋचां यजुषां साम्नां च मन्त्राणां विनियोगो भवति । ऋग्वेदसंहितायां सूक्तानि, अनुवाकाः, मण्डलानि इति विभागक्रमोऽस्ति । यजुर्वेदे पञ्चाशत्, अनुवाकः, प्रश्नः अष्टक मिति क्रमेण विभागो ऽस्ति । सामवेदे पूर्वार्चिका उत्तरार्चिकेति प्रधान भागद्वय मस्ति । प्रतिभागं खण्डाः अध्याया श्चेति विभागक्रमोऽस्ति । अथर्वणवेदे सूक्तं, अनुवाकः प्रपाठकं, काण्ड मिति विभागोऽस्ति । एवं विद्या श्चत्वारोऽपि वेदाः परम्पराभ्यस्ततया आम्नाय इति छन्दोबद्धतया छन्द इति ब्रह्मप्रतिपादकतया ब्रह्मेति च प्रसिद्धि गताः । वृत्तबद्धाः स्तुतिपरा ऋचः, गीतिरूपाणि गेयानि सामानि, तद्व्यतिरिक्तानि गद्यमयानि यजूंषि इति त्रयी-स्वरूपं वदन्ति । ऋक्शास्त्रीयाः "बहु च" इति सामशाखीया "छन्दोगाः" इति यजुश्शाखीयाः "अध्वर्यवः" इति वैदिक संज्ञां प्राप्ताः । क्रतुषु ऋग्यजुस्सामाथर्व वेदविदः क्रमेण होता अध्वर्युः उद्गाता ब्रह्मा इति तत्तस्थानापन्ना भवन्ति । चतुर्विधाना मपि वेदमन्त्राणां उदात्तानुदात्तस्वरितभेदेन

सस्वर पाठ नियमो वरीवर्ति । स्वरतोऽपराध: महान्तं दोषं जनयेदिति प्रतिपादयन्ती "इन्द्रशत्रो:" वैदिकी गाथा काचिच्छ्रूयते । प्रतिवेदं संहिता (मन्त्रभाग:) ब्राह्मणानि आरण्यकानि उपनिषद श्चेति प्रधानविभागोऽस्ति । स्तुतिपरा: देवता प्रतिपादका मन्त्रा:, विधिनिषेधात्मकानि ब्राह्मणानि प्रायेण अरण्येऽध्येयानि आरण्यकानि ब्रह्म प्रतिपादका वेदान्ता: उपनिषद श्च भवन्ति ।

उपनिषद: — यथा वेदा श्चत्वारस्तथा वेदान्ता: दश प्रसिद्धा: । ईश - केन - कठ - प्रश्न मुण्डक-माण्डूक्यानि छान्दोग्यं तैत्तिरीयं ऐतरेयं बृहदारण्यक मिति दशो पनिषदो ब्रह्मतत्वनिरूपणे प्रथिता स्सन्ति ।

वेदाङ्गानि — वेदाङ्गतया प्रसिद्धानि शिक्षादीनि षट् सन्ति । "तत्रेयं कारिका शिक्षा व्याकरणं छन्दो निरुक्तं ज्यौतिषं तथा । कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिण:" इति ।

लौकिक साहित्यम् — एवं वेद - प्रामाण्ये धर्मप्रतिपादके ज्ञान-विज्ञानप्रदे च सुस्थिते सति वेदानुबन्धतया लौकिक-साहित्येऽपि "आयुर्वेदो धनुर्वेदो गान्दर्ववेद: शिल्पवेद:"

इत्युपवेदा स्तत्तद्विषय मधिकृत्य प्रवृत्ता: वेदशब्दवाच्यतां भजन्ति ।

उपवेदा:

गन्धर्ववेदे "स-रि-ग-म-प-द-नि" इति सप्तस्वरशोभितं सगीतशास्त्रं नाटय शास्त्रंचान्त र्भवति । गान्धर्ववेदस्य "नाटयवेद" इति शिल्पवेदस्य स्थापत्यवेद इति च नामान्तर मस्ति । पुर-ग्राम-तटाकाराम देवालयादि-निर्माणे समुपयुक्तं वास्तुशास्त्रं शिल्पवेदेऽन्तर्भवति । यथा वेदा: उपवेदा श्च चत्वारो ज्ञान-विज्ञान प्रदाने प्रसिद्धा: तथा "भारतं पञ्चमो वेद:" "वेद: प्राचेतसा दासी त्साक्षाद्रामायणात्मना" इति सूक्तिभ्यां रामायण-महाभारतयो: भारतीयेतिहासयो: वेदात्मकत्व सुप्रसिद्धम् । वाल्मीकि - वेदव्यासौ काव्यमर्यादया भारतीय संस्कृति प्रवर्तका वभूताम् । अत एव भारतीयानां वेदा इव रामायण-महाभारते प्रमाणकोटा वन्तर्भवत:; प्राधान्यं च भजत: ।

पुराणानि — सस्कृतस्य लौकिकवाङ्मये अष्टादश पुराणानि उपपुराणानि नानाविधानि तन्त्राणि च प्रादुर्भूतानि । अष्टादश - पुराणां कर्ता सत्यवतीसुत:, इति सूक्त्या वेदव्यास: चतुर्लक्षश्लोकै: अष्टादश-पुराणानां सहिता विरच्य सूतपुत्राय रोमहर्षणायाऽकथयदिति ज्ञायते ।

भारतीयं स्वर्णयुगम्

भारतीयेतिहासस्य कतिपया विभागः अवश्यकर्तव्या स्सन्ति। यथा संस्कृतवाङ्मये वैदिक - लौकिकभेदेन द्वैविध्य मस्ति; तथा भारतीयेतिहासस्याऽपि स्थूलतो वैदिकयुगं लौकिकयुग मिति विभागद्वय मेष्टव्यं भवति। लौकिकयुगेऽपि प्राचीनयुग मध्ययुगं आधुनिकयुग मिति त्रैविध्यं सम्भवति। अस्यैव विभाग-क्रमस्य हिन्दुयुगं, महम्मदीययुगं आंग्लेययुग मिति क्रमशो नामान्तरं संगच्छते कस्मिन् कस्मिन् वा युगे किं किं प्रधानवृत्तं सञ्जात मित्येतदधिकृत्य ऐतिहासिका निरूपयन्ति। भारतीयेतिहासे पूर्वापरपर्यालोचने क्रियमाणे सत्येव कः कालविशेषोऽस्मिन्तं विलक्षणतया विशिष्यः इत्येतन्निर्णेतुं शक्यते। तदर्थं स्थूलतो भारतीय लौकिकेतिहासस्य वृत्तान्ताः अत्र प्रतिपाद्यन्ते।

वैदिकयुगे भारतवर्षे राज्यानि अल्प-स्वल्पान्यासन्। तान्येव गच्छति काले लौकिकयुगे महत्त्वं प्राप्तानि रूपान्तरं नामान्तरं चाऽभजन्। एव मुत्तरभारते क्री.पू. 600 वर्षपरिमिते काले तादृशानि राज्यानि ऊनाविंशतिसंख्याकान्यासन्। तेषु कतिपयानि राजन्याधीनानि कतिचन गणतन्त्राधीनानि चाऽसन्। राजायत्तेषु मगध

राज्यं नितान्तं विश्रुत मासीत्। गणतन्त्रायत्तेषु तावत् कपिलवस्तु (साकिया) वैशाली च (लिच्छवि) प्राधान्यं भजतः। गौतमबुद्धः महावीर श्च एतद्गणराज्यवासिनौ भवतः। गौतमबुद्धेन स्थापितं प्रवर्तितं च मतं बौद्धमत मिति प्रथितम्। "अहिंसा परमो धर्मः" इति मुख्यतमं सूत्र मवलम्ब्य बौद्धमतं विश्व-विश्रुत मासीत्। न केवलं भारतीयाः, किंतु चैना - जपान-टिबेट् (त्रिविष्टपं) प्रभृति विदेशेष्वपि बहवो जना बौद्धमतावलम्बिनो बभूवुः। तन्मन्तानुयायिनां कृते देशे विदेशे च तत्र तत्र चैत्यानां विहाराणां च निर्माण मासीत्। एव मेव महावीरेण स्थापितं प्रवर्तितं जैनमत मपि अहिंसाप्रधानं बहवोऽनुययुः। बौद्धा जैना श्च जनसामान्यसुलभासु भाषासु स्वीयान् धार्मिकग्रन्थान् व्यरचयन्। बौद्धं जैनं च समानतन्त्र भवति। तेषां मते चातुर्वर्ण्यं निरस्तं, सर्वमानवसमत्वं सम्भावितम्।

क्री. पू. 327 वर्षसमये ग्रीक्देशात् अलेग्जाण्डर् (अलकसुन्दरः) नाम जगज्जेगीयमानो वीराग्रेसरः पञ्जाब-देशं (पञ्चनदं) अभिदुद्राव। तदा जील (वितस्ता) चीनाब् (असिक्ना-चन्द्रभागा) नद्यो र्मध्यदेश - पालकः पुरुषोत्तमो नाम राजा (पोरस्) भारते तस्य प्रपञ्चवीरस्य प्रथमप्रतिभटतां स्वीयांन्यरूपयत्। यद्यपि पुरुषोत्तमः

समरे पराजित, तथाऽपि स प्रतिवीरेण धैर्यसाहसयो स्सबहुमानं सम्भावितः।अ लेग्जाण्डर्-महावीरो वीरोचित मौदार्यं प्रदर्शयामास । महावीरेण तेन पुरुषोत्तमाय राज्ञे पुन स्तदीयं राज्यं कतिपयप्रदेशं साकं प्रत्यर्पितम् । ततः प्रभृति पश्चिमासियादेशै स्साकं भारतस्ययातायातयोः वाणिज्यसम्बन्धस्य मतसिद्धान्त - विज्ञान - प्रचारस्य च महानवकाश स्समजनि ।

अलेग्जाण्डर् महावीरस्य भारताभियाना दनन्तरं क्री. पू. 322 वर्षे मौर्य श्चन्द्रगुप्तः नन्दवशीयान् राज्ञः संहृत्य मगधराज्यं स्वायत्तीचकार । कौटिल्यनामा तस्य महामन्त्री महान् विद्वान् राजनीतिकुशल श्चाऽसीत् । तस्यैव मन्त्र - शक्त्या चन्द्रगुप्तो न केवलं मगधराज्यस्य किन्तु, पञ्जाब् - आफ्गनिस्थान् - बेलूचिस्थान्-प्रदेशाना मपि आधिपत्यं प्राप्तवान् । सेल्यूकस् नाम (शेल्यकेशः) ग्रीक्राजा युद्धे चन्द्रगुप्तेन पराजितः । बहूनां राज्यानां समुदायस्य साम्राज्य मिति तस्य चाधिपतिः सम्राडिति अथवा चक्रवर्तीति नाम प्रथितमासीत् एवं च गुप्तो मौर्यः स्वीयं राज्यं साम्राज्यरूपेण विस्तारयामास । एवं स्थापितस्य मौर्यसाम्राज्यस्य चक्रवर्ती प्रप्रथम श्चन्द्रगुप्तो मौर्य आसीत् ।

मौर्यचन्द्रगुप्तस्य मन्त्री कौटिल्यःअर्थशास्त्रं व्यरचयत्। तस्मिन् ग्रन्थे मौर्यसाम्राज्यस्य परिपालनविधानेन कथम्भाव्यमिति सूचित मस्ति। साम्राज्यस्य सर्वाधिकारी चक्रवर्ती भवति। तस्य सहायकाः अमात्याः अध्यक्षाश्चासन्। तस्य महत्सैन्य मप्यासीत्। साम्राज्यं (राष्ट्रेषु) राज्येषु नगरेषु ग्रामेषु च विभक्त मासीत्। ग्रीक् - राजदूतः मेगस्तनीस् नाम (मेघस्थान) स्वकीये "इण्डिका" नामके ग्रन्थे एवं व्यलिखत् - "मौर्यपरिपालनविधाने नगर - पालन - विधानं, सैन्यपरिपालनविधानं च अवधेयं भवति। पश्चादशोकस्य धर्मशासनान्यपि परिपालनविधानं सूचयन्ति।

मौर्यचन्द्रगुप्तस्य पुत्रो बिन्दुसारः; अस्य पुत्र एव अशोकः। मौर्यचक्रवर्तिनां मध्ये अशोको महान् विश्रुतः। अयं क्री.पू. 273 आरभ्य क्री.पू. 236 पर्यन्तं साम्राज्यं पर्यपालयत्। क्री.पू.261 तमे वर्षे प्रवृत्ते कलिंगयुद्धं विजेता भूत्वाऽपि विजित इव महान्तं क्लेश मन्वभवत्। तस्मिन् हि युद्धे शतशोऽथ सहस्रशः संहृताः। क्षतगात्राणा मार्तनादाः तदीयानां स्त्री बाल-वृद्धानां हाहाकाराश्च दिशो दश व्यनादयन्। असृङ् नद्यः प्रावहन्। सुदुर्दर्शं सुदारुण मिदं हत्याकाण्ड स्वयं साक्षात्कृतवतः अशोकस्य (नाम्नैव)मनसि महान् शोकः सञ्जातः। अय मेव शोकः

अशोकचक्रवर्तिनं महान्त मकार्षीत् । ततः प्रभृति चक्रवर्ती युद्धविमुखो बभूव । अहिंसा सिद्धान्तयुतं बौद्धमत मव-लम्ब्य धार्मिकराज्येन अशोको नूनं वीतशोक स्सुचिरं प्रजानुरञ्जने निमग्न आसीत् । तदानीं शिलास्तम्भेषु धर्म शासनानि व्यलसन् । यद्यपि तदा संस्कृतं राजभाषाऽ सीत्, तथाऽपि सामान्य जनभाषायां (पाली) सुखबोधाय धर्म शासनानि विलिखितानि । (प्रजोपयोगीनि बहूनि कार्याण्यशोक श्चकार । प्रधानमार्गाणा मुभयोः पार्श्वशोः वृक्षारोपणं, मनुष्याणा मिव जन्तूनामपि चिकित्सालयाः, वापी-कूप-तटाकादीनां धर्मशालादीनां च निर्माणः इत्यादिके दत्तदृष्टि रशोकः सर्वमहान् संजातः । सर्वमतसहिष्णुता कला प्रियता मगधसाम्राज्ये सर्वत्र राजाश्रयेणाभिव्याप्याऽसीत् ।) विशिष्य राजनान्यां पाटलीपुत्रे महत्सौधानि बृहन्मण्टपाः असंख्येया विहारा श्च निर्मिताः । बुद्धस्य अस्थिशकला निक्षिप्य अर्धगोळाकारेण बृहस्थूपानां चैत्यानां - निर्माण मासीत् । तादृशेषु संचीस्थूपः महान् प्रसिद्धः । तस्यौ-न्नत्यं 50 पञ्चाशत्पदाधिकं भवति । अस्य शिखरे पद्म-पत्रं तदुपरि सिंहाः गजा श्च शिलाविलिखिता स्सन्ति । स्थूपा स्सर्वेऽपि सुस्निग्धा भवन्ति ।

भारते ग्रीक्जैत्रयात्रानन्तरं विदेशीय-जैत्र-यात्रिणां मध्ये कुषन्वशीयाः प्रमुखा भवन्ति । ते क्रीश-३०

प्रान्तकाले आप्गन्स्ताने (अफ्घनस्थाने) महत्तरं साम्राज्यं स्थापयित्वा क्रमशः भारतस्योपरि दण्डयात्रा मकुर्वन्। कनिष्क स्तेषां राजाऽसीत्। सः क्री. श. 162 पर्यन्त साम्राज्यं शशास। स काश्मीरं जित्वा कुषान्साम्राज्यं भारते विस्तारयामास। तस्य राजधानी पुरुषपुर (पेषावर) मासीत्। सः तदनुयायिन श्च भारतीयाचारान् बौद्धमतं चाऽवसरन्। कनिष्केण समादृतं बौद्धमतं नव्यमार्गं गतं सत् "महायान" मिति प्रथितम्। महायानमतस्य हिन्दुमतस्य च भेदः स्वल्पः यत स्तस्मिन् बौद्धमतप्रभेदे बहवो भारतीयाचाराः सम्प्रदाया श्चान्तर्भूता स्सन्तः महत्त्वं बहुजनादराभिमानस्वरूपं कल्पयामासुः। कनिष्को महान् विद्वज्जन पोषकः। तस्यास्थाने अश्वघोष श्चरकश्च प्रमुखा वास्ताम्। चरकः "चरकसहिते" ति आयुर्वेदग्रन्थं व्यरचयत्। कनिष्कस्य शासनकाले स्थूपानां विहाराणां च निर्माणं, रोमनसामाज्येन सह विदेशीय वाणिज्याभिवृद्धि श्चेत्यादिकं समभवत्।

मौर्यसाम्राज्यपतनानन्तरं विख्यातेषु हिन्दुसाम्राज्येषु गुप्तसाम्राज्य मुल्लेखनीयं भवति। इदं क्री.श. 320 प्रान्ते स्थापितं उनानून 200 वत्सरपर्यन्तं उच्चस्थिति मवाप्नोत्। गुप्तचक्रवार्तिषु समुद्रगुप्तः चन्द्रगुप्तः चन्द्रगुप्त - विक्रमादित्य श्च प्रसिद्धास्वास्ताम्। समुद्रगुप्तो यदा सिंहासनाधिष्ठितो बभूव, तदा तदीय राज्यं स्वल्प मासीत्।

किन्तु, स बहूनि युद्धानि कृत्वा गङ्गानदीपरिसरप्रान्तान् सर्वान् स्वायत्तीचकार। तदनन्तरं दक्षिणापथेऽपि बहून् प्रान्तान् प्रदेशां श्च जिगाय। निज - विजय प्रशस्ति घोषयन्नयं महान्तं अश्वमेधयागं चकार। न केवल मयं महावीर इति किन्तु संगीत साहित्ययो रपि कुशलो महान् रसिक स्सहृदय: कविराजं श्चेति विश्रुत:। तदनु तदीय: कुमार श्चन्द्रगुप्तो द्वितीय: राजा बभूव। स पितर मप्यतीत्य पराक्रमशाली व्यराजत। स मालव-सौराष्ट्र विजित्य गुप्तसाम्राज्यं पूर्वाभ्यधिक वर्धयामास। अत एव तस्य "विक्रमादित्य" इति प्रशस्ति-नाम (उपाधि: बिरुदं सञ्जातम्।

गुप्तराजन्या: प्रजानुरञ्जनेन साम्राज्य मकुर्वन्। तेषां समये हिन्दुनागरिकता उच्चस्तिथि गता। बहव: प्रसिद्धा: कवयस्तेषा मास्थानेषु व्यलसन्, येषां मध्ये नव-रत्नानि इति प्रख्याता: कविशेखरा आसन्। काळिदासो नवरत्नाना मन्यतम: कविशेखर:। तेन संस्कृते रघुवंशं, मेघसन्देशं, कुमारसम्भवं, माळविकाग्निमित्रं, अभिज्ञान-शाकुन्तल मित्यादीनि काव्यानि विरचितानि। अन्येऽपि कवय: पुराणं, गणितशास्त्रं, ज्योतिश्शास्त्रं, धर्मशास्त्रं, इत्यादिविषय मधिकृत्य महाग्रन्थान् व्यरचयन्। गुप्त-राजन्या हिन्दुमतप्रजारस्य तत्संस्कृतिप्रदर्शकस्य देवालयादि

निर्माणस्य च महान्तं प्रोत्साहं प्रायच्छन् । सौन्दर्यशोभितानि भित्तिचित्राणि तेषां काल एव विराजितानि । अजन्ता गुहासु चित्रितेषु बहूनि गुप्तवंशीयानां काले विलसितानि । गुप्तानधिकृत्य फाहियान् - नामकः चीनयात्री बहुसुष्ठु व्यावर्णयत । भारतीयेतिहासे गुप्तानां काल एव स्वर्णयुग मिति ख्यातिं गतः ।

अभ्यासः

प्रश्नाः, – 1) भारतीयेतिहासस्य युगविभागं निरूपयत ।

2) लौकिकयुगे भारते राज्यानां स्थितिः कीदृशी?

3) अलेग्जाण्डरस्य भारताभियानं कोन्यवर्तत्? कः परिणामः?

4) मौर्यसाम्राज्यं केन स्थापितम्?

5) अशोकचक्रवर्तिनः परिपालनं कीदृशम्?

6) कनिष्कः कः? तस्य पालनं कीदृशम्?

7) गुप्तसाम्राज्यस्य स्थापकः कः?

8) विक्रमादित्यः कः? तस्य आस्थाने के के स्थिताः?

9) कः कालः स्वर्णयुग मित्युच्यते? कुतः ।



गायस्व भारतम्!

(गेयवैर्वापीतः)

यं देशं प्रेष्यसि, यत्र वा भ्रमसे,
गायस्व भारतं घननाद मधुरम् ।
भाषस्व संस्कृतं परितोष-विधुरम् ॥ ॥ यं देशं ॥

धन्योऽसि मान्योऽसि पुण्यवानसि त्वं,
भारते जातोऽसि धर्म्यजीवनेन ।
संस्कृतं भाषसे सरल मधुरतरम् ॥ ॥ यं देशं ॥

ऋषिवर्य-मनतपः पावितानुगणात्र
स्थल-जलाकाश तेजोवायुकलितेऽत्र
खादसि मोदसे पिबसि व्याहरसि ॥ ॥ यं देशं ॥

सकलभाषा मूलसंस्कृतं गीः स्तव
सकल विज्ञान धन साहिती सम ते
पुण्यभारतदेश गण्योऽसि धन्योऽसि ॥ यं देशं ॥

सौवर्ण मालिका कलित ग्रीवोऽसि
वहसि हस्ते । पठसि रत्नधा शास्त्रम् ।
भारतीयोऽसि, सुरभारतीभाषीऽसि ॥ ॥ यं देशं ॥

शूरोऽसि, वीरोऽसि, धीरोऽसि नित्यं
शान्तोऽसि, दान्तोऽसि, कान्तोऽसि स त्वं
त्वयि नाऽस्ति भीरुता मोहता ह्यधुना ॥ यं देशं ॥

अभ्यासः

सारांशः – भारत - ख्याति गातुं कवि र्युवकान् प्रोत्साहयति । हे! युवन्! त्वं यदि देशा द्देशान्तरं गच्छसि, तर्हि भारतमातुः भारतीय संस्कृतेः तन्मूलभूतायाः संस्कृतभाषाया श्च प्रशस्ति गायस्व । त्वं धन्योऽसि, यत स्त्वं पुण्यपरिपाकेन भारते जातोऽसि । प्राचीन-महर्षीणां शम-दयादिगुण-सम्पत्तिः धर्मतः प्रजापालन-निरतानां राजर्षीणां शौर्य-वीर्यादि गुणसम्पत्ति श्च यत स्त्वयि स्वतस्सिद्धाऽस्ति, अत एव त्वं नरवरोऽसि, जगन्मान्योऽसि । स्वकीयार्षविज्ञानेन, सदाचारेण सद्व्यवहारेण च स्वदेशस्य स्वभाषायाः संस्कृतस्य संस्कृते श्च वैभवं तत्र तत्र प्रख्यापय.; यं देश मेष्यसि, यत्र वा क्रमसे ।

प्रश्नः – 1) भारतीयः कीदृशः?

2) अस्य गेयस्य सारांशः कः?

विवरणम् – 1) ऋषीणां वर्याः श्रेष्ठाः तेषां घनेन = गाढेन, तपसा पाविताः = पवित्राः अणवः, तेषां गणैः आढ्याः = युक्ताः ।

2) स्थलं, जलं, आकाशं, तेजः, वायु श्च, एतैः कलितः (देशविशेषः) ।

3) सकलानां भाषाणां मूलं (यत्) संस्कृतम ।

4) सकलस्य विज्ञानस्य धन-वरूपा साहिती ।

5) सुवर्णस्य इमाः सौवर्णाः, तथाभूताभिः मालिकाभिः कलिता गैर्वाणी । सैव गैर्वाणिका ।

विग्रहः – घने नादेन मधुरम् = घननादमधुरम्
परिदोषैः विधुरम् = परिदोषविधुरम्
भव्य श्चासौ विभव श्च = भव्य विभवः
सुरभारत्याः दासः – सुरभारतीदासः

तद्धितान्तः - भारतस्य इदं — भारतं; भारतस्य अयं — भारतीयः ।

सुवर्णस्य इमाः — सौवर्णाः ।

भीरोः भावः — भीरुता ।

घोरस्य भावः — घोरता ।

हीनस्य भावः — हीनता ।

माला एव मालिका
गैर्वाणी एव गैर्वाणिका } स्वार्थे क प्रत्ययः
युवा एव युवकः


मध्यमपुरुषः - गायस्व भाषस्व (विध्यर्थकः)

वर्तमानकालः - क्रमसे, भाषसे, मोदसे, (आत्मनेपदी)

असि, खादसि, पिबसि, व्याहरसि

वहसि, पठसि (परस्मैपदी)

भविष्यत्कालः - एष्यसि ।



आचार्यत्रयम्

आर्षविज्ञानेन विद्योतितेऽस्मिन् भारतवर्षे, आसेतुहिमाचलं सनातनवैदिकधर्मप्रतिष्ठापनेन आध्यात्मिकविद्याप्रबोधेन च जगद्गुरुरिति विख्याताः श्रीशंकरभगवत्पादाः श्री भगवद्रामानुजाचार्याः आनन्दतीर्थापरनामधेयाः श्री मध्वाचार्याश्चेत्येते "आचार्यत्रय" मिति सर्वैः सादरं सभक्तिश्रद्धं च पूज्यन्ते। वेदान्तेषु प्रसिद्धानां द्वैताऽद्वैततत्त्वानां विशेषतः गौरवगरिमास्पदं मासीत्।

श्री शङ्कराचार्याः – केरळदेशे कालटीनामकाग्रहारे शिवगुरोः आर्याम्बायां च परमेश्वरानुग्रहेण यत्पुत्ररत्नमजनिष्ट, स एव परस्तात् शंकराचार्यनाम्ना विश्रुतः अद्वैततत्त्वप्रबोधकश्चाऽभवत्। कृतोपनयनसंस्कारः शङ्करः शैशवेऽभ्यस्तविद्यस्सन् भिक्षार्थं कस्मिंश्चिद् गृहाङ्गणे समागतः। दारिद्र्यदोषेण भिक्षाप्रदानेऽसमर्था गृहिणी केवल मेक मामलक मञ्जलिपात्रे निधाय साश्रुनयना तस्थौ। तदीया मनोवेदनां दयार्द्रहृदयो विज्ञाय जगन्मातरं लक्ष्मी मस्तौषीत्। प्रसन्नायाः लक्ष्म्याः कटाक्षवीक्षणेन तद्गृहांगणे कनकामलकवृष्टि र्ववर्ष। बालशंकरकृतः स एव कनकधारास्तव इति प्रसिद्ध आसीत्।

शंकरः बालभावे एव मात्रानुमतः गोविन्दयतिवरस्य सन्निधौ सन्यासं स्वीकृत्य बादरायण प्रणीतस्य ब्रह्मसूत्र-ग्रन्थस्य सरहस्य मुपदेशं सविवरणं प्राप्तवान् । ततः प्रस्थितः शंकरः प्रयागक्षेत्रे सजीवं चितां प्रविष्टं भट्टपाद-मुपेत्य तदीयवृत्तान्तं समग्र माकर्ण्य ततो निवारयितुं प्रायतत । देहत्यागे कृतनिश्चयेन भट्टपादेन प्रचोदित स्सन् शंकरः माहिष्मतीनगरे विद्यमानं तच्छिष्य मण्डन-मिश्र वादे विजित्य स्वमतावलम्बिन मकरोत् । मण्डनमिश्र-एव पश्चात्सुरेश्वराचार्य इति नाम्ना प्रख्यातः । काश्यां शंकरः यदा ब्रह्मसूत्राणां भाष्यं विरचयन्नास्त, तदा स्नानार्थं गङ्गातीरं गच्छन् स प्रातरुत्थाय "डुकृञ्-करने" इति धातुं वारंवार रटन्तं व्याकरण विद्यार्थिनं सम्बोध्य "भज गोविन्दं" इति श्लोकमालया प्रबोधयामास । शंकराचार्यस्य शिष्येषु सनन्दनः, यः पद्मपाद इति विश्रुतः सुरेश्वरः यस्य पूर्वाश्रमे मण्डनमिश्र इति नामान्तरम्; हस्तामलकः, यस्तावद् ब्रह्मतत्वं हस्तामलकवत् न्यरूपयत्; आनन्दगिरिः, यः तोटकवृत्तै गुरुदेव मस्तौषीत्, तत एवं तोटकाचार्य इति ख्यातः एते प्रसिद्धा स्सन्ति ।

शंकराचार्यः प्रस्थानत्रय मिति प्रसिद्धानां ब्रह्म-सूत्राणां उपनिषदां भगवद्गीताया श्च भाष्याणि विरच्य शिष्यैस्तेषां टीका व्याख्या श्च विरचय्य सुरेश्वरादि

शिष्यगणेन सह दिग्विजयात्रार्थं प्रस्तस्थे । जैत्रयात्रायां शाक्तेयान् शैवान् वैष्णवान् चतुर्मुखमतस्थान् अग्नि-सूर्य गणपति प्रभृतिदेवतोपासकान् एवम्भूता नन्यान्यमतस्थान् वादेषु विजित्य स्वीय मद्वैततत्वं प्रबोधयामास । अन्ततो गत्वा काश्मीरदेशे विद्यमानं शारदापीठं अधिष्ठाय श्रीशंकरभगवत्पादाः स्वसर्वज्ञतां प्राचीकशन् ।

अद्वैतसिद्धान्तसारांश स्त्वावत् - "ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नाऽपरः" इति ।

श्रीभगवद्रामानुजाचार्याः – दक्षिणभारते मदरास् नगरात् काञ्चीपुरमार्गे श्री पेरुम्बूदूरु (भूतपुरी) नामके कस्मिश्चित्पट्टणे क्री. श 1017 तमे वर्षे (4117 तमे कल्यब्दे, पिङ्गळनामके वत्सरे मेषमासे शुक्लपञ्चम्यां आरुद्रानक्षत्र प्रयुक्त-गुरुवासरे कर्कटकलग्ने) आसुरु केशव सोमयाजिनः कान्तिमत्यां पुत्ररत्नं समजनि; यस्य च नामकरणोत्सवे समागतेन मातुलेन श्रीशैलपूर्णेन (तिरुमलनम्बि) लक्ष्मण इति शिशो र्नाम कृतम् । तदेव "रामानुज" इति नामान्तरस्य भुवनविख्यातस्य मार्गदर्शक मभूत् ।

रामानुजः काञ्चीपुरे प्रसिद्धाद्वैतपण्डितस्य यादव प्रकाशस्य सविधे वेदान्तविद्याभ्यासं कर्तु मारेभे । कदाचिद्गुरुः "कप्यासं पुण्डरीकाक्षं" इति वाक्यं नीचोपमान

पुरस्सरं व्यवृणोत् । भगवतो नेत्रसौन्दर्यस्य गुरुणा प्रतिपादितं कपिपृष्ठौपम्यं श्रोतु मसहमानो रामानुजः गम्भीराम्भःसम्भूतारुणारुणतामरस-सादृश्य मुपापीपदत् । यादवप्रकाशो रामानुजेन नवं परिभव मात्मनः कृत ममन्यत । भूताविष्टाया राजकुमार्या विषये यादवप्रकाशस्य उच्चाटनमन्त्रेऽकिञ्चित्करे सति रामानुजस्तं भूतं राजकुमारीं विहाय बहिर्गन्तुं यदाऽदिशं तत्समनन्तर मेव प्रभोः पुत्री भूतपीडा विमुक्तासीत् । इद मपि गुरोः यादवप्रकाशस्य क्षते क्षारायितम् । असूयाग्रहस्तो गुरुः शिष्यं रामानुजं काशीमार्गे व्यापादयितुं प्रायतत । गुरो द्रोहचिन्तनं विज्ञाय रामानुजः स्वात्मानं भगवदनुग्रहेणारक्षत् !

गृहस्थो रामानुजः काञ्चीपुरे काञ्चीपूर्णेन (तिरुक्कच्चिनम्बि) प्रबोधित स्सन् वरदराजस्वामिनः आलये कैंकर्यं कुर्वन्नास्त । यामुनाचार्यस्य (आळवन्दार्) शिष्याग्रेसरेण महापूर्णेन (पेरियनम्बि) पञ्चसंस्कारान् प्रापितः श्रीरामानुजः कदाचित् परमगुरुं यामुनाचार्यं सेवितुं श्रीरङ्ग जगाम । तदानीं मेव परमपद गतस्य यामुनार्यस्य अङ्गुलित्रिकं कुञ्चितं विलोक्य तदीयाभिलाषां स्त्रीन् पूरयितु प्रतिजज्ञे । तदनन्तरं संकुचितं अंगुलित्रयं सुखप्रसारित मासीत् । ब्रह्मसूत्राणां विशिष्टाद्वैत-भाष्यप्रणयनं, शठकोप

वाङ्मये भक्तिप्रपत्तिनिरूपणं पुराणरत्न (विष्णुपुराण) प्रणेतुः श्रीपराशरभट्टारकस्य श्रीवेदव्यासस्य च स्मारकः प्रकल्पन चेति त्रयोऽभिलाषाः यामुनार्यस्य अपूर्णाः स्थिताः।

सन्यासस्वीकारानन्तरं श्रीरामानुजः यतिराजाह्वयेन व्यवहृत आसीत्। यामुनार्यशिष्येषु प्रमुखस्य गोष्ठीपूर्णस्य सकाशे महाता प्रयासेन मूलमन्त्रोपदेशं (तिरुमन्त्रम्) प्राप्य परसमृद्धि कांक्षमाण स्सन् आलयगोपुर मारुह्य सर्वान् जनानाहूयताननुजिघृक्षु स्तेभ्यः सर्वेभ्यः स्वस्य दुर्लभं मुलमन्त्रं तेषां सुलभ मकार्षीत्। अत एव रामानुजेन प्रवर्तितस्य श्रीवैष्णवमतस्य रामानुज दर्शन मिति प्रशस्ति रासीत्। श्रीरामानुजस्य कीर्ति र्दिगन्तव्यापिनी बभूव। बहव श्शिष्याः तं माचार्यं समाश्रयन्। तेषां श्रीवत्साङ्कमिश्रः प्रमुखः, यस्य सुतयोः पश्चात् पराशरस्य व्यासस्य च उपकारस्मरणार्थं "व्यासभट्टः, पराशरभट्टः" इति नाम कृत्वा रामानुजः यामुनार्यस्य अभिलषाणां त्रयाणां मध्ये एक मपूरयत्। श्रीवत्साङ्क एव कूरेशाभिधानः कुलोत्तुंगचोळस्य राज्ञः "शिवात्परतरं नास्ति" इति सिद्धान्तआक्यं "द्रोणमस्ति ततः परं" इति प्रतिवादेन निरश्चकार। एवं यज्ञमूर्तिः वादे विजितः श्रीरामानुजस्य शिष्याग्रेसर आसीत्। दाशरथि र्नाम अन्यः कश्चित्तस्य शिष्य (मुद्रलियाण्डान्) आसीत्।

गोविन्दमिश्रः प्रथमं शैवो भूत्वा श्रीशैलपूर्णस्योपदेशेन श्रीवैष्णवोऽभवत् । अय मपि रामानुजस्य शिष्यबृन्दे प्रमुख आसीत् ।

श्रीरामानुजः ब्रह्मसूत्राणि विशिष्टाद्वैतं प्रतिपादयन्ति इति बहुधा विचिन्त्य तदनुगुणा बोधायनवृत्ति मनुसृत्य श्रीभाष्यरचना मकार्षीत् । रामानुजमतस्य प्रमाणं तु उपनिषदः द्रविडोपनिषदिति प्रख्याताः नालायिरदिव्य प्रबन्धा श्च उपनिषद्भाषा संस्कृतं चेत् प्रबन्धभाषा द्राविडी- दिव्यप्रबन्धा वेदान्तसार इत्यभिधीयते । अत एव रामानुजदर्शन मुभयवेदान्तसिद्ध मिति व्यवह्रियते । द्राविड- भाषायां "आळ्वार्" शब्दस्य भागवत (भगवति भक्तः) इत्यर्थः । आळ्वार् कीर्तिता दिव्यप्रबन्धाः भगवद्भागवत- सम्प्रदायानुरोधेन विशिष्टाद्वैतस्य मेव प्रतिपादयन्ति । तथा च रामानुजोपज्ञतया उभयवेदान्ताभिधानेन प्रवर्तितं विशिष्टाद्वैतमत मतीव प्राचीनमिति पूर्वाचार्यसम्मत मिति च ज्ञायते ।

श्रीरामानुजाचार्यः कुम्भकोणा दारभ्य पश्चिमतीर मनुसृत्य बदरिकाश्रमपर्यन्तं जैत्रयात्रां विधाय, तत्र तत्र वादेषु पाषण्डान् चार्वाकान् बौद्धान् जैनान् मायावादिनः शाक्तेया नन्यां श्च विमतस्थान् शेमुषीवैभवेन निजमहिम्ना

वाङ्मये भक्तिप्रपत्तिनिरूपणं पुराणरत्न (विष्णुपुराण) प्रणेतुः श्रीपराशरभट्टारकस्य श्रीवेदव्यासस्य च स्मारकः प्रकल्पन चेति त्रयोऽभिलाषाः यामुनार्यस्य अपूर्णाः स्थिताः।

सन्यासस्वीकारानन्तरं श्रीरामानुजः यतिराजाह्वयेन व्यवहृत आसीत्। यामुनार्यशिष्येषु प्रमुखस्य गोष्ठीपूर्णस्य सकाशे महाता प्रयासेन मूलमन्त्रोपदेशं (तिरुमन्त्रम्) प्राप्य परसमृद्धि कांक्षमाण स्सन् आलयगोपुर मारुह्य सर्वान् जनानाहूय ताननुजिघृक्षु स्तेभ्यः सर्वेभ्यः स्वस्य दुर्लभं मुलमन्त्रं तेषां सुलभ मकार्षीत्। अत एव रामानुजेन प्रवर्तितस्य श्रीवैष्णवमतस्य रामानुज दर्शन मिति प्रशस्ति रासीत्। श्रीरामानुजस्य कीर्ति र्दिगन्तव्यापिनी बभूव। बहव श्शिष्याः तं माचार्यं समाश्रयन्। तेषां श्रीवत्साङ्कमिश्रः प्रमुखः, यस्य सुतयोः पश्चात् पराशरस्य व्यासस्य च उपकारस्मरणार्थं "व्यासभट्टः. पराशरभट्टः" इति नाम कृत्वा रामानुजः यामुनार्यस्य अभिलषाणां त्रयाणां मध्ये एक मपूरयत्। श्रीवत्साङ्क एव कूरेशाभिधानः कुलोत्तुंगचोळस्य राज्ञः "शिवात्परतरं नास्ति" इति सिद्धान्तवाक्यं "द्रोणमस्ति ततः परं" इति प्रतिवादेन निरश्चकार। एवं यज्ञमूर्तिः वादे विजितः श्रीरामानुजस्य शिष्याग्रेसर आसीत्। दाशरथि र्नाम अन्यः कश्चित्तस्य शिष्य (मुद्रलियाण्डान्) आसीत्।

गोविन्दमिश्रः प्रथमं शैवो भूत्वा श्रीशैलपूर्णस्योपदेशेन श्रीवैष्णवोऽभवत् । अय मपि रामानुजस्य शिष्यबृन्दे प्रमुख आसीत् ।

श्रीरामानुजः ब्रह्मसूत्राणि विशिष्टाद्वैतं प्रतिपादयन्ति इति बहुधा विचिन्त्य तदनुगुणा बोधायनवृत्ति मनुसृत्य श्रीभाष्यरचना मकार्षीत् । रामानुजमतस्य प्रमाणं तु उपनिषदः द्रविडोपनिषदिति प्रख्याताः नालायिरदिव्य प्रबन्धा श्च उपनिषद्भाषा संस्कृतं चेत् प्रबन्धभाषा द्राविडी-दिव्यप्रबन्धा वेदान्तसार इत्यभिधीयते । अत एव रामानुजदर्शन मुभयवेदान्तसिद्ध मिति व्यवह्रियते । द्राविडभाषायां "आऴ्वार्" शब्दस्य भागवत (भगवति भक्तः) इत्यर्थः । आऴ्वार् कीर्तिता दिव्यप्रबन्धाः भगवद्भागवत-सम्प्रदायानुरोधेन विशिष्टाद्वैतस्य मेव प्रतिपादयन्ति । तथा च रामानुजोपज्ञतया उभयवेदान्ताभिधानेन प्रवर्तितं विशिष्टाद्वैतमत मतीव प्राचीनमिति पूर्वाचार्यसम्मत मिति च ज्ञायते ।

श्रीरामानुजाचार्यः कुम्भकोणा दारभ्य पश्चिमतीर मनुसृत्य बदरिकाश्रमपर्यन्तं जैत्रयात्रां विधाय, तत्र तत्र वादेषु पाषण्डान् चार्वाकान् बौद्धान् जैनान् मायावादिनः शाक्तेया नन्यां श्च विमतस्थान् शेमुषीवैभवेन निजमहिम्ना

च विजित्य, ततः श्रीकूर्मं सिंहाचलं श्रीशैलं (तिरुमलै) इत्यादि दिव्यक्षेत्रेषु श्रीवैष्णयमतं प्रतिष्ठाप्य, त्रैविद्य चूडामणिः श्रीरङ्गेशजयध्वजो विजयते स्म। गद्यत्रयं, वेदान्तदीपः वेदान्तसारः, वेदार्थसंग्रहः, भगवद्गीताभाष्यं श्रीभाष्य मित्यादयो ग्रन्थाः श्रीरामानुजाचार्येण प्रणोताः। अनेनाचार्योतमेन वैष्णवदेवालयेषु पाञ्चरात्रागमोक्तेन विधानेन आराधनाक्रमं व्यवस्थापयामास। अद्यापि सर्वैः श्रीवैष्वाचार्यैः "सर्वदेश-दशा-कालेष्वव्याहतपराक्रमा, रामानुजार्यं दिव्याज्ञा वर्धता मभिवर्धता" मिति नित्यानुसन्धाने समुद्घुष्यते। भक्ति प्रपत्तिश्च श्रीरामानुजसिद्धान्तस्य जीवो जीवातुरिति हृदयम्।

श्रीमध्वाचार्याः - कर्नाटकराज्ये दक्षिणकन्नडप्रान्ते "उडिपि" नामकस्य पट्टणस्य समीपे "सगरि" नामकाग्रहारे मध्यगेह भट्टनामधेयस्य ब्राह्मणोत्तमस्य धर्मपत्न्याः गर्भशुक्तिमुक्ताफलायितं केनचिद्दैवांशेन उडिपिपट्टणे सन्निहिं न अनन्तेश्वरस्वामिना प्रचोदितस्य भगवतो वायो र्जगत्प्राणस्य अंशेन - यस्य जातस्य पिता "वासुदेव" इति नाम चकार। तच्च नामधेयं "व+असुदेव" इति व्युत्पत्त्या जीवोत्तमो भगवान् वायु र्जगत्प्राणदेव इत्यर्थं प्रयच्छति। वासुदेवः बाल्य एव स्वमहिम्ना ब्रह्मरक्षसः

शापविमुक्ति मनुजग्राह ।

जगत्सर्वं मिथ्येत्यवहेलनपुरस्सरं अहं ब्रह्मास्मीति दुरहंकारमाश्रितवतां, अस्माभि र्न किञ्चित्कर्तव्यं सर्वं स एव सर्वेश्वरः परिरक्षेत्, अस्माभि स्तु केवलं प्रपन्नै र्भाव्य मिति आत्मार्पणं प्रबोधयतां प्रच्छन्नशून्यवादिनां च वादान् निरस्य, वेदानां उपनिषदां ब्रह्मसूत्राणां च द्वैतमतानुसारेण व्याख्यानानि विरच्य सत्यमार्गप्रतिष्ठापनं कर्तुं भगवान् वायुराचार्यरूपेण अवातरदिति द्वैतमतावलम्बिनां विश्वासः ।

शैशवादारभ्यैव वासुदेवस्य माहात्म्यं पदे पदे प्रकटित मासीत् । ब्रह्मरक्षसः शापविमुक्तिः अन्न प्राशनार्हे शैशवे डोलायां रुदतः अपूपभक्षणं व्यापारिणे धनं दास्यामीति प्रदत्तानां तिन्त्रिणीबीजानां स्वर्णगुळिकतया परिवर्तनं, करस्थं शुष्ककाष्ठं भूमौ रूढमूलं कृत्वा तस्य किसलयशोभितत्वापादन मित्यादिकं तदीयं प्रभाव माप-यति । गुरुकुले विद्याभ्यासकाले वासुदेवो व्यायामेन प्राणायामेन च हृष्टः पुष्टः सुदृढगात्र श्चाऽसीत् । षोडशवर्षदेशीयस्य वासुदेवस्य पितृभ्यां विवाहप्रयत्ने क्रियमाणे सति. स उडिपि-क्षेत्रे अच्युतप्रेक्षनामकस्य यतिवरस्य सन्निधौ वेदान्तविद्याभ्यासं कर्तुं जगाम । अच्युतप्रेक्षः तस्मै श्रीमच्छंकरभगवत्पादाना मद्वैतसिद्धान्तं प्रबोधयामास ।

सर्वेऽप्यद्वैतग्रन्थाः वासुदेवेन सश्रद्धं पठिताः, परन्तु तस्य तस्मिन् सिद्धान्ते बहव स्संशया स्समुत्पन्नाः। शिष्य-संशयनिवारणेऽसमर्थः अच्युतप्रेक्षः। रोषकषायितेक्षणस्सन् अन्तेवासिनं दूरतो निष्कासयामास। पुन श्शिष्यवत्सलेन तेन वासुदेवः स्वान्तिक मानीतः। तत्त्वजिज्ञासायां गुरु-शिष्ययो र्वादोपवादा यदा प्रवर्तमाना आसन् तदा गुरुः सिद्धान्तभेद मसहमानः कूष्य न्नैत्रास्सीत्। अत्रान्तरे विवाहविमुखं वासुदेवं पितरौ अनुनेतुं पादग्रहण मकार्ष्टाम्। एतत्संघटनं पुरस्कृत्य वासुदेवो जननीजनका वेव माह-विधिप्रेरितौ भवन्तौ मम प्रणामं विधाय मत्परिव्राजकत्वं स्वीकृतवन्ताविति। पितरौ निरुत्तरौ निराशाखिन्नवदनौ निवृत्तौ। अनन्तरं वासुदेवः अच्युतप्रेक्षा द्यतिवरा द्विधिवत्सन्यासं स्वीकृत्य तेन प्रदत्तं पूर्णप्रज्ञ (आनन्दतीर्थः) इति नाम लेभे।

उडिपिमठे प्रायेण प्रवृत्तासु विद्वत्सभासु वादगोष्ठीषु अद्वितीय प्रतिभाशाली पूर्णप्रज्ञः प्रतिवादिनां भयङ्कर आसीत्। तेन तुष्टो गुरु रच्युतप्रेक्षः पूर्णप्रज्ञं स्वमठाधि-पति कृत्वा शिष्यानुद्दिश्य "वत्साः! इतः पर मय मेव युष्माकं गुरुर्भविष्यति। यतीश्वरोऽय मितः प्रभृति आनन्द-तीर्थ इति व्यवह्रियेतेत्याह।

आनन्दतीर्थः अनन्तेश्वर मठाधिपति र्भूत्वा शिष्येभ्यो

वेदान् वेदान्तां श्च बोधयन्नास्त। अद्वैतसिद्धान्तं विमृश मयं महात्मा दिग्विजययात्रा मकार्षीत्। वादगोष्ठीषु परमतखण्डनपुरस्सर स्वमतस्थापन मेव मकरोत् – सकलकल्याणगुणपरिपूर्णः शंखचक्रगदाधरः भगवान् हरि रेव परं ब्रह्म, परमात्मा, सर्वेश्वरो भवति। सनातनधर्माख्यस्य महावृक्षस्य वेदा मूलानि, उपनिषदः प्रकाण्डः, इतिहासपुराणानि शाखोपशाखाः, अत स्तत्वनिरूपण मेत स्समन्वये नैव कर्तव्यम्। एवं सति जीवेश्वरयो रभेदो नाऽस्ति परस्परभेद एव। जीवा अपि सात्त्विकाः नित्यसंसारिणः, तमोयोग्या इति त्रिधा भवन्ति। जगदपि सत्यमेव न मिथ्या। जीवेश्वर भेद इव जगदीश्वरभेदः- जगज्जीवभेदः, जीवानां परस्परभेदः, जगद्वस्तूनां परस्पर भेद श्चेति द्वैतमते पञ्चविधा भेदा स्सन्ति। द्वैतं नाम भेदः। आनन्दतीर्थस्य भेदसिद्धान्त एव द्वैतमत मित्युच्यते। अस्मिन् मते जीवाः हरे र्दासभुताः सेवां कुर्युः। जीवानां योग्यतानुसारेण हरि र्मोक्षं प्रयच्छति।

कलियुगे वायुदेवः सत्यमतं स्थापयितुं "मध्व" नाम्ना अवतरिष्यतीति प्रथितवचन मनुसृत्य आनन्दतीर्थ एव मध्वाचार्य इति व्यवहृत आसीत्। तदीयं मध्वमत मित्यप्यभिधीयते। रामावतारसमये हनूमान् कृष्णावतारकाले भीमसेनः कलियुगे मध्वाचार्य श्च वायुदेवांशसम्भूता इति वदन्ति।

प्रश्नाः – 1) आचार्यत्रय मिति व्यवहारः केषाम्?

2) श्रीशंकराचार्यः कुत्र अजायत?

3) श्रीशंकराचार्यस्य महिमा कीदृशी?

4) प्रस्थानत्रयं नाम किम्?

5) श्रीशंकराचार्यस्य सिद्धान्तः कः?

6) श्रीरामानुजाचार्यः कुत्र कदा समजनि?

7) गुरु यादवप्रकाशः श्रीरामानुजं व्यापादयितुं कुतः प्रायतत?

8) श्रीरामानुजाचार्यस्य महिमा कीदृशी?

9) यामुनाचार्यस्य संकुचिताङ्गुलित्रिकस्य अभिप्रायः के?

10) श्रीरामानुजाचार्यस्य प्रसिद्धाः शिष्याः के?

11) रामानुजदर्शनं किमिति प्रसिद्धम्? कथम्?

12) श्रीरामानुजसिद्धान्तः कीदृशः?

13) श्रीमध्वाचार्यः कस्य देवस्य अंश इति प्रसिद्धिः?

14) वासुदेवस्य बाल्य-वृत्तान्तः कीदृशः?

15) श्रीआनन्दतीर्थस्य सिद्धान्तः कीदृशः?

16) श्रीशंकराचार्यस्य जीवितविशेषान् संक्षपेण लिखत?

17) श्रीरामानुजाचार्यस्य जीवितगाथा सक्षिप्य लिखत?

18) श्रीमध्वाचार्यस्य वृत्तान्तं संग्रहेण प्रतिपादयत ।



लोकमान्यः

भारत-स्वातन्त्र्य-समर-समयेऽयं निनादो नितान्त प्रचलित आसीद्यत् "लाल्-बाल्-पाल्" इति। पञ्जाब्-केसरीति बिश्रुतो लाला लजपतिरायः, लोकमान्य, इति प्रथितो बालगंगाधरतिलकः, वङ्गबन्धुरिति विख्यातो विपिनचन्द्रपाल श्चेति राजनैतिक-नायक-त्रयं तदात्वे भारतीय-स्वातन्त्र्य-समरस्य पुरोभागे समुपस्थित मासीत्। नायकत्रये मध्यमणिन्यायेन विभ्राजमानो बालगंगाधर-तिलकः न केवलं राजनैतिक क्षेत्रे नेतृत्व निरवहदिति, किन्तु, भारतसांस्कृतिक क्षेत्रेऽपि स महत्तरं वैदुष्यं प्रादर्शयत्। एवं महान् विद्वान् नायकाग्रेसरो बालगंगाधरः भारतमातुः पुत्ररत्नेषु अनितरसाधारणं महोन्नतं स्थानं प्राप्नोत्।

बालगंगाधरः महाराष्ट्रप्रदेशे रत्नगिरि - मण्डले (जिलायां) चिखल-ग्रामे क्रा. श. 1856 तमे वर्षे जूलै मासे 23 तमे दिनांकेऽजनिष्ट। गंगाधरपंडितः (पंत्) पार्वतीबाई च तस्य माता-पितरौ भवतः। बालगंगाधर तिलको बाल्ये संस्कृत मपठत्। उन्नतविद्याभ्यासकाले महाविद्यालये तस्य ऐच्छिकविषयो गणित मासीत्। कलाशाला - विद्यार्थिदशाया मेव तिलक - महाशयस्य मनसि देशसेवाभावना प्रादुर्भूता।

उन्नत विद्याभ्यासानन्तरं स देशे प्रवर्तमान आंग्लेयानां परिपालनं दोष-जुष्ट जुघोष । प्रजासेवार्थं 1885 तमे वर्षे भारत - राष्ट्रीय-कांग्रेस्-पक्षः (इण्डियन् नेषनल् कांग्रेस्) स्थापित आसीत् । तत्र दादाभाई नौरोजी, फिरोज्षा मेहता, सुरेन्द्रनाथबेनर्जी, गोपालकृष्ण-गोखले, बिपिनचन्द्रपालः, लाला लजपतिरायः, इत्येवमादयो बहवो राजकीयनायका बालगंगाधरेण साकं प्रजाहितकार्याणि कर्तु मारेभिरे । तिलक महोदयः "केसरी" नाम मराठी पत्रिकां "मराठा" नाम आंग्ल-पत्रिकां च प्रारभ्य स्वीय-विचार-धारां जन-बाहुल्ये प्रचारयामास । 1896 तमे वर्षे महाराष्ट्रे दुर्भिक्ष प्लेग्-व्याधि-बाधा च व्यजृम्भत । तदात्वे आंग्ल - सर्वकारोऽपि जनान् पीडयितुं प्रावर्तत । तिलकमहाशयः सर्वकारस्य कुत्सितां नीतिं स्वीय केसरी-पत्रिकायां सुतीक्ष्णं विममर्श । परिणामत स्सर्वकार स्तस्योपरि अभियोग मारोप्य सार्धवर्षं कठिनतरो-दण्ड व्यधात् । अस्मिन्नेव च सन्दर्भे तस्य नाम लोकविश्रुत मासीत् । एवं स सर्वै र्जनै "लोकमान्यः" इत्युद्घोषितः । क्री. श. 1905 वर्षे वङ्ग - भंग - विवादः समुपस्थितः । हिन्दु मुस्लि-भेदं प्रकल्पयितु मेव तदानीन्तनः राजप्रतिनिधिः (वैस्राय्) वङ्गप्रदेशं द्विधा विभक्तुं प्रायतत । विभज्य पालयेति हि आंग्लेयानां राजनीतिः । वङ्गवासिना मिदं मत्यन्त मप्रिय मरुन्तुदञ्चाऽसीत् ।

वंगबन्धु बिपिनचन्द्रपालः पञ्जाबकेसरी लालालजपतिरायः लोकमान्यो बालगंगाधरतिलक श्च सम्भूय प्रजोद्यमनेतृत्वं स्वीकृत्य घोरविरोधेन आंग्लेयकूटनीतेः शृङ्गभङ्ग मकार्षुः। वङ्ग-भङ्गो निरुद्ध आसीत्। तदारभ्य देशे सर्वत्र स्वातन्त्र्यान्दोळन मुपक्रान्तम्। विदेशि-वस्तु-बहिष्कारः प्राबल्येन प्रचार-पथ गतः। अनेन साकं विप्लवकाराणां बृन्दं आंग्लेय-पालन मन्तं गमयितुं तीव्रतरं प्रयतमान मासीत्। सर्वकारं प्रति प्रतिकूल-प्रचारः आंग्लेयाना मुपरि हिंसा-हत्या-प्रयत्नाः, कोशागारेभ्यः राजस्वापहरणं, तत्र तत्र सार्वजनिकसम्पत्ते विध्वसकाण्डाः इत्यादिकं तेषां नित्यकृत्य मासीत्। तेषां मध्ये खुदीराम्-बोस्-नामा विप्लवनायकः बन्धितो मृत्युदण्डं च घोषितः। तदानीं तिलकमहाशयः स्वातंत्य्-शंखारव मापूर्य विप्लववकाराणां कृत्यानि समर्थयन् सर्वकारचर्यां खण्डयामास। अत स्तस्योपरि क्रीशः 1908 वर्षे हिंसाप्रोत्साहनाभियोगं आरोप्य (6) षड्वर्षपर्यन्तं देशाद्बहि द्वीपान्तरवासदण्डो विहितः। तदा लोकमान्यः स्वस्य निर्दोषतां निरूपयितुं निर्भय मेव माह - "नाऽहं दोषजुष्ट इति मदीयोऽन्तरात्मा कथयति। स्वातन्त्र्यं नामस्माकीनोऽधिकारो जन्मसिद्धः। आजान्मसिद्ध मिम मधिकारं वय मवश्यं प्राप्स्यामः" इति।

वर्मादिशं मण्डले-कारागारे निबद्धो लोकमान्यो धिषणा निकरोपलायमानान् बहून् ग्रन्थान् व्यरचयत्।

देशवासिनां कृते कर्तव्य प्रबोधकं "गीतारहस्यं" आर्याणां मूलस्थान निरूपकं "आर्याणां उत्तरध्रुव-निवासो वैदिकः" (आर्कटिक होम् इन् दि वेदास्) वेदानां प्राचीनतानिरूपकं "मृगशिरा" (ओरियन Orion) नामकं चेत्येतद्ग्रन्थ रत्नत्रयं लोकमान्यस्य न केवलं राजनैतिकं पाण्डित्यं, किन्तु सांस्कृतिक भारतीयवैदुष्य मपि प्रकटयति।

लोकमान्य बालगंगाधरतिलक महोदयस्य जीवित चरितादस्माक मनुकरणीया बहवो गुणा यथा-निर्भीकता, कर्तव्य - पालनं. विद्यासक्तिः, देशभक्तिः, त्यागः, मातृ भाषाभिमान इत्यादयो भवन्ति। तदीयगुणावलम्बन मेवाऽस्माकं शरण्यं, यदि वयं तस्याऽराधनं कर्तु मिच्छामः।

अभ्यासः

प्रश्नाः — 1) 'लाल्-बाल्-पाल्' इत्यस्य निनादस्य कोऽर्थः?

2) बालगंगाधरतिलकस्य जन्म कुत्र कदा जातम्?

3) बालगंगाधरस्य विद्याभ्यासः कथ मासीत्?

4) भारत-राष्ट्रीय-कांग्रेसपक्षः कदा किमर्थं स्थापितः?

5) तिलकमहोदयेन साकं के या राजकीयनायकाः प्रजासेवां कर्तुम् आरेभिरे?

6) तिलकमहोदयः 'लोकमान्य' इति कथं प्रसिद्धः आसीत्?

7) तिलकमहोदयः स्वीय विचारप्रसारं कथं रचयामास?

8) आंग्लेयानां कुटिलराजनीते रुदाहरणं किम?

9) तिलकमहाशयस्य कुतो द्वीपान्तरवासदण्डो विहितः?

10) बालगंगाधरतिलक महाभागस्य प्रसिद्धा ग्रन्थाः के?

मधुरं मधुरं

(गेयगैर्वाणीतः)

गिरयो मधुरा स्तरवो मधुराः,
मधुराः सरितश्च दिशो मधुराः,
निखिलं वरभारतवर्ष भवं.
मधुरं मधुरं मधुरं मधुरम् ।।

मधुरा दिवसा, मधुराश्च निशाः,
ऋतवो मधुराः, शरदो मधुराः,
सकलं सुरभारतभूमिभवं ।। ।। मधुरं ।।

मधुरा प्रकृति र्मधुरा प्रगतिः,
मधुरा सुषमा गण-भारत जा,
मधुरं चरितं ध्रुवसंस्कृतिजा ।। ।। मधुरं ।।

पुलिनं मधुरं, सिकता मधुरा,
सलिलं मधुरं, लहरी मधुरा,
सकलं सुर शैवलिनी प्रभवं ।। ।। मधुरं ।।

कृतयो मधुराश्च, कला मधुराः,
मधुरो विनयो, मधुरश्च नयः,
सकलं प्रियभारत मातृभुवो ।। ।। मधुरं ।।

श्रुतयो मधुराः, स्मृतयो मधुराः,
निखिला श्च पुराणकथा मधुराः.
सकलं मुनिभी रचितं मधुरं ॥ ॥ मधुरं ॥

मधुराति पदानि, गुणो मधुरो
मधुरा रसरीनि रलंकृतिका,
निखिलं खलु संस्कृतसाहितिकम् ॥ ॥ मधुरं ॥

सारांशः – भारतमातुः सेवानिरतः कविः समस्तं भारतवर्षभवं वस्तु-जातं मधुरं मधुरान्मधुरं च मन्यते । एवं स सर्वाणि रूपाणि विचित्य धीरः प्रकर्षेण मधुर मुदगायति । स्थूलं, सूक्ष्मं, दिव्यं, भव्यं, प्राकृतिक, मातृदेश-भक्ति-भाववना माधुर्येण भरित मस्ति । किञ्चिन्मधुर चेत, कश्चिन्मधुरः, काचित्काचिन्मधरा च स्यात् । कानि कानि मधुराणि के के काः काश्च मधुरा इति पाठकैः परिगणनीयम् ।

प्रश्नः — 1) वरभारत वर्षभवं सकलं मधूरं कुतो भवति?
2) अस्य गेयस्य सारांशः कः?

विवरणम् — 1) वरे भारतवर्षे भवतीति = वर भारतवर्षभवम् ।
2) सुरैः (अभिलष्यमाणा) भारतस्य भूमिः । अत्र भवतीति ।
3) गण (प्रधानं) भारतं, अत्र जायत इति
4) सुराणां शैवलिनी = नदी, ततः प्रभव. यस्य तत् ।

विग्रहः — पुराणानां कथाः = पुराणकथाः ध्रुवा च सा संस्कृति श्च = ध्रुवसंस्कृति,, तस्याः संजातम् । रसानां रीतिः — रसरीतिः, संस्कृतस्य साहिती = संस्कृतसाहिती, सैव साहितिका ।
सन्धिः — मुनिभिः + रचितम् = मुनिभी रचितम् ।

(पुनः + रमते = पुना रमते)

गिरयः + मधुराः = गिरयो मधुराः ।

तरवः + मधुराः = तरवो मधुराः ।

दिशः + मधुराः = दिशो मधुराः ।

ऋतवः + मधुराः = ऋतवो मधुरामः ।

शरदः + मधुराः = शरदो मधुराः ।

प्रकृतिः + मधुरा = प्रकृति र्मधुरा ।

कृतिः + मधुरा = कृतिर्मधुरा ।

श्रुतिः + मधुरा = श्रुतिर्मधुरा ।

स्मृतिः + मधुरा = स्मृतिर्मधुरा ।

तद्धितान्तः — अलंकृतिः एव = अलंकृतिका }
साहिती एव = साहितीकम् } स्वार्थं 'क' प्रत्ययः ।

शीवलं अस्या मस्तीति - शीवलिनी - नदी ।

	ए.व.	द्वि.	ब.व.
पुं. लि –	मधुरः	मधुरौ	मधुराः
स्त्री. लि –	मधुरा	मधुरे	मधुराः
न. पुं. लि –	मधुरम्	मधुरे	मधुराणि



महान् वैज्ञानिकः

भारतीया महापुरुषा ये तावत्स्वदेश-गौरव-गरिमानं देश विदेशेषु सुदूरं प्रख्यापयामासुः, तेषु श्रीचन्द्रशेखर वेङ्कटरामन् - महोदयस्य (सि.वि. रामन्) नामधेयं विशेषत स्सुगृहीतं भवति। आध्यात्मिकक्षेत्रे स्वामी विवेकानन्दः, कविता जगति रवीन्द्रनाथठाकुरः, राजनैतिक-क्षेत्रे महात्मा मोहनदासकर्मचन्द्र-गान्धिश्चे त्यादयो यथा भारतीय-कीर्ति-प्रतिष्ठादिक मभिवर्धयामासु स्तथा वैज्ञानिक - प्रपञ्चे प्रप्रथमं नोबुल्-पुरस्कारं विजित्य भारतीय कीर्तिपताका विष्करणेन श्रीचन्द्रशेखर-वेङ्कटरामो यशोविशाल स्समभूत्।

क्री.श, 1889 तमे वर्षे श्री चं. वे. रामः तिरुचनापल्ली नगरे (त्रिशिरः पुरी) कस्मि श्चिन्मध्यवर्गीय-कुटुम्बे जनि मलभत। अस्य पिता अध्यापकः. माता संस्कृते विदुषी चाऽसीत्। बालक रामस्य प्रतिभा बाल्यादारभ्य प्रस्फुटाऽ भवत्। अत एव स पश्चात् (प्रकाश) कान्तिध्वनि ञ्चाधिकृत्य परिशोधयितुं प्रभवति स्म। विद्यार्थिदशाया मेव रामः अत्यधिकसंख्याकान् भौतिकविज्ञानग्रन्थानपठत्। एवं तस्य वैज्ञानिको अभिरुचिः प्रावर्धत। यदा स द्वादश-वर्ष देशीय स्तदैव मेट्रिक्परीक्षाया मुत्तीर्णोऽभवत्। तत श्च विश्वविद्यालयेऽध्येतुं प्रविवेश। क्री.श. 1904 वर्षे विद्यार्थी रामः बि. ए, परीक्षायां प्रथम-शेण्या मुत्तीर्णोऽ-

भवत् । तस्य प्रतिभया प्रभावितः प्रसन्न श्चाचार्यगणः तस्मै बहूनि अध्ययनसौकर्याण्यकल्पयत् । अधीयान एव रामोऽनेकान् नवीनप्रयोगान् कुर्वन्नास्त । तदाधारेण तेन विरचिता निबन्धाः (व्यासः) विदेश-पत्रिकासु सादर सम्मानपुरस्सर च प्रकाशिता आसन् ।

वर्ण पट-मापकस्योपरि (स्पेक्ट्रम) प्रयोगान् कुर्वन् वेंकटरामः सन्निष्कर्ष मधिकृत्य निबन्ध मेक मलिखत्- लण्डन् - पत्रिकायां प्रकाशन मभवत् । अनेन मौलिक, वैज्ञानिक-निबन्धन रामस्य महती प्रशस्ति र्लब्धा । तदानीं रामः केवलं 18 अष्टादश वर्षदेशीय एवाऽसीत् । बहवो वैज्ञानिक - विद्वांसः तदीयप्रतिभाविता बभूवुः । मेधावी रामः विश्वविद्यालयस्य अन्तमपरीक्षायां विशिष्ट - श्रेण्यां समुत्तीर्णः ।

वयस्यष्टादशवर्ष देशीयो रामः अखिल भारतीय-प्रतिस्पर्धायां वर्ग-प्रथम-स्थान प्राप्य सर्वान् जनान् विस्मिता नकार्षीत् । परिणामतः आर्थिकविभागेऽयं प्रधानगणकाधि-कारिणः (अकौण्टेण्ट् जनरल्) पदव्यां नियुक्तः । इयत्यल्पे वयसि ईदृशी मुन्नतपदवीं प्राप्तवन्तो विरला एव स्युः । 1916 वर्षे रामः सर्वकार-पदवीं दरित्यज्य कलकत्ता-विश्वः विद्यालये परिशोधन-कार्यं कुर्वन्नासीत् । तदीयशोधनेषु सर्वश्रेष्ठं वैज्ञानिकशोधनं "रामप्रभावः" (रामन् एफेक्ट्)

भवति। प्रपञ्चप्रसिद्धेषु उत्कृष्टाविष्कारेषु रामप्रभावाविष्कारः परिगण्यते। एतदर्थ मेवाऽयं नोबुल्-पुरस्कारेण सम्मानितः। कान्तेः ध्वनेश्च सम्बन्धे यद्वैज्ञानिकं परिशोधन मनेन कृतं, तत एवाऽयं महावैज्ञानिकश्रेण्यां लब्धप्रतिष्ठोऽभवत्।

एवं रामः अणुषु अयस्कान्तप्रभाव मधिकृत्य विशेषतः परिशीलन मकरोत्। अस्मिन्नपि प्रयोगे स कृतकृत्यो नूतनविषय माविश्चकार। यद्यपि त्रिविधासु वैज्ञानिक - शाखासु अयं महाशयः कृतार्थता मेवाऽभजत्; तथापि राम - प्रभावान्वेषणं तावत् वैज्ञानिक - प्रपञ्चे सञ्चलन मसृजत्। अनेनाविष्कारेण विज्ञानसम्बन्धिनां मुख्यानां जटिलानां च बहूनां प्रश्नानां समाधानान्युपलब्धानि।

कान्तिप्रवेशानुकूलपदार्थः एकवर्णदीप्त्या प्रदीप्तश्चेत् तर्हि पतितस्य प्रकाशस्य कतिपयभागाः तेन पदार्थेन सर्वतोमुख" विकीर्णा भवन्ति। एवं विकीर्णे प्रकाशे एतत्प्रकाशस्य कम्पनैः साकं अतिरिक्तं यत्कान्तिप्रकम्पनं परिदृश्यते तत्तत्पदार्थस्य गुणनिबन्धन मिति तत्त्वम्। अर्थात् – पदार्थेन प्रकाशो यदा विकीर्यते तदा प्रकाशकम्पनभेदे इदं कारणं भवति यत् प्रकाशप्रमाणकस्य तद्विकिरणकारि पदार्थकणजालस्य च शक्तिपरिवर्तनं संजायत इति भावः। तथा च पदार्थेन विकीर्णायाः

कान्तेः वर्णचित्रे मूलप्रकाश-रेखाभिस्साकं तत्सन्निहिताया नवीना कान्तिरेखा दृश्यन्ते तासा मेव "रामन्-प्रभाव" इति नाम संजातम्; यत इदं रामोपज्ञं नवीन दर्शन मासीत्। विकिरणदशायां कान्तिः पदार्थेन प्रभाविता चाऽसीदिति यावत्। एवं कान्तिविकिरणे पदार्थप्रभावं रामो न्यरूपयदिति अस्य सिद्धान्तस्य "राम-प्रभावो" नाम प्रसिद्धम्।

अमूल्यैः — விலைமதிப்பற்ற

रामन् - महोदयस्य मौलिक सिद्धान्तैः प्रभाविताः प्रपञ्चे विद्यमाना इतरदेशाः एनं महाशयं भाषण-प्रदानार्थं निमन्त्रयामासुः। एवं देश - विदेशेषु परिभ्रम्य स्वीयै रमूल्यै वैज्ञानिकभाषणै र्जगत्सर्वं विद्योतयामास। सर्व-श्रेष्ठेषु कतिपयेषु वैज्ञानिकेषु अस्य महोदयस्य गणना क्रियते। एवं लब्धप्रतिष्ठोऽप्ययं महाशयो विनम्रताया निराडम्बरताया श्च प्रतीक मभवत्।

important-? JTU to count

अभ्यासः

प्रश्नाः — 1) स्वदेश-गौरवं के महापुरुषाः प्रख्यापयामासुः? कथम्?

2) सर् सि. वि. रामन् महोदयस्य जन्म कदा कुत्र सञ्जातम्?

3) तदीयं विद्याभ्यास-पाटवं कीदृशम्?

4) सि. वि. रामन् महोदयः कस्यां पदव्यां कर्म कुर्वन्नासीत्?

5) "राम-प्रभावो" नाम कः? कीदृश, पुरस्कारः तदर्थं तेन लब्धः?

6) रामन् महोदयस्य परिशोधनाकार्याणि कानि?

7) वैज्ञानिक-प्रपञ्चे रामन्-महोदयस्य स्थानं कीदृशम्?

8) महावैज्ञानिकस्य रामन्-महाशयस्य जीवित-संग्रहं लिखत?

भजस्व मातरम्

(गेयगैर्वाणीतः)

(भजस्व मातरं. भजस्व भारतम् ।)

अगण्य – पुण्य – धारिणीं
अनन्य सुलभ – तारिणीं
अखण्ड – विभव – मोदिनीं
अनन्त – शक्तिशालिनीम् ॥ भजस्व ॥

पराधिकार वैरिणीं
वराधिकार हारिणीं
सदा सुशीलमोदिनीं
सदाऽपि शान्तवादिनीम् ॥ ॥ भजस्व ॥

पवित्र तीर्थपावनीं
विचित्ररूपभासिनीं
अजस्र सत्य सेविनीं
अनर्घशीलचारिणीम् ॥ ॥ भजस्व ॥

प्रपञ्चसौख्यरक्षणीं
प्रचण्डवैरिशिक्षणीं
वितण्डवादभेदिनीं
प्रतारकापनोदिनीम् ॥ ॥ भजस्व ॥

(गेयगैर्वाणीत:)

सारांश: – राष्ट्रीय-भावनया प्रेरित: कवि: मातृ - भक्त्या साकं मातृ-देश - भक्ति मप्युपदिशति। 'जननी जन्मभूमि श्च स्वर्गादपि गरीयसी' खलु। अगण्य-पुण्य-वैभव, अनन्त-शक्ति, शालिता च यथा मातु स्तथा भारतमातु रप्यस्ति। स्वातन्त्रय लक्षणं पराधिकार – निरसनं: वराधि – कार – स्वीकरणं-अहिंसा, सत्य, शान्तिप्रियता, 'सर्वे जना: सुखिनो भवन्त्विति, प्रपञ्चसौख्याभिलाषश्चे त्यादय स्सुगुणा: भारतभूमिभाज' सुलभा:; किमुत भारतीयाया: सन्तते: परम्परागताया:।

भजस्व ॥

प्रश्न: — 1) भारतमाता कीदृशी?
2) अस्य गेजस्य सारांश: क:?

विवरणम – 1) गणयितुं शक्यानि = गण्यानि, न गण्यानि = अगण्यानि
2) परेषां अधिकारे वैरं अस्या अस्तीति।
3) वरं श्रेष्ठं अधिकारं हरति = स्वीकरोति इति।
4) प्रपञ्चस्य सौख्यं रक्षतीति।
5) पवित्रे तीर्थे पावनी।

भजस्व ॥

कर्त्रर्थका: कृदन्ता: (स्त्री. लि.) क्रिया:

धारिणी-धरतीति' धारयतीति वा
तारिणी-तरतीति, तारयतीति वा
मोदिनी-मोदत इति
हारिणी-हरतीति
वादिनी-वदतीति
भासिनी-भासत इति
सेविनी-सेवत इति
चारिणी-चरतीति

विरुद्धार्थका:

गण्यानि × अगण्यानि
पुण्यं × पापम्
सुलभम् × दुर्लभम्
सुशीलं × दुश्शीलं
शान्तं × अशान्तं
पवित्रं × अपवित्रं
सत्यं × असत्यं
सौख्यं × असौख्यम्

भजस्व ॥

भजस्व ॥

रक्षणी – रक्षतीति

भेदिनी – भिनत्तीति

शिक्षणी – शिक्षयतीति

(अघ) नोदिनी–(अघ)नुदतीति

अर्थभेदः – तारकः = सः, य स्तारयति ।

प्रतारकः = वञ्चकः

परः = शत्रुः, श्रेष्ठः

परः = श्रेष्ठः, अनुग्रहः

समानार्थकाः – अगण्यः, अखण्डः, अनन्तः,

सदा, अजस्रं

एकवाक्यता – यत्र कर्तृभेदेन क्रियाभेदेन च नानाविधानि वाक्यानि न भवन्ति, तत्र एक मेव वाक्यं भवतीति मन्तव्यम् । अत्र गेये 'त्वं मातरं भारतं भजस्व' इति एक मेव वाक्य मस्ति। चतुर्षु चरणेषु भारत मातुः गुण-गण बोधकानि विशेषणान्येव प्रयुक्तानि । अतः चतुर्भिः चरणैः प्रतिपादि वशिष्ठां भारतमातरं भजस्व, इति एकवाक्यता सिद्धयति ।

★

सुभाषितानि

(भर्तृहरिशतकम्)



केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला:
न स्नानं न विलेपनं न कुसुमं नाऽलंकृता मूर्धजा: ।
वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते
क्षीयन्तेऽखिलभूषणानि सततं वाग्भूषणं भूषणम् ।।

दाक्षिण्यं स्वजने दया परिजने शाठ्यं सदा दुर्जने
प्रीति स्साधुजने नयो नृपजने विद्वज्जने चार्जवम् ।
शौर्यं शत्रुजने क्षमा गुरुजने कान्ताजने धृष्टता
ये चैवं पुरुषा: कलासु कुशला स्तेष्वेव लोकस्थिति: ।।

मौना न्मूक: प्रवचनपटु र्वाचको जल्पको वा
धृष्ट: पार्श्वे भवति च वसन् दूरतोऽप्यप्रगल्भ: ।
क्षान्त्या भीरु र्यदि न सहते प्रायशो नाऽभिजात:
सेवाधर्म: परमगहनो योगिना मप्यगम्य: ।।

प्रदानं प्रच्छन्नं गृह मुपगते संभ्रमविधि:
प्रियं कृत्वा मौनं सदसि कथन चाऽप्युपकृते:
अनुत्सेको लक्ष्म्यां निरभिभव-सारा: परकथा:
सतां केनोद्दिष्टं विषम मसिधाराव्रत मिदम् ।।

परिशिष्टम्

(GLOSSORY OF WORDS)

पाठः – 1

मत्या — By mind
कृत्या — By action
भक्त्या — By devotion

पाठः – 2

व्यपदेशेन — In the name of elders
सिद्धिः — Achievement

पाठः - 3

गणतन्त्रं – Federal System
हत्याकाण्डः — Genocide
धर्मशासनानि – Inscriptions-on Dharma
चिकित्सालयः — Hospital
मतसहिष्णुता — Religious tolerance
कलाप्रियता – Love of aıt
जैत्रयात्रा — Invasion
राजधानी — Capital City
उल्लेखनीयम् — Important or Notable
ऊनानूनं — More or less

पाठः – 4

गायस्व भारतं — Sing of India
भाषस्व संस्कृतं — Speak of Sanskrit
भारते जातोऽसि — You are born in India
सकलभाषामूलं — Origin of all languages
गैर्वाणी गैर्वाणिका — Sanskrit language
भीरुता — Timidness cowardness
वीरः — Hero

पाठः – 5

द्वैतं — Dualism
अद्वैतं — Non-dualism
विशिष्टाद्वैतं — Non dualism with many Charactari-sation
विश्रुत. — Famous
क्षते क्षारं — Hit by it

कैंकर्यं — Worship

परसमृद्धिः — Well wish

दिगन्तव्य पिनी — All spread

श्रीभाष्यं — Auspicious commentry on Brahma Sutras by Ramanuja

दिव्य प्रबन्धाः – Songs sung by Alwars

नित्यानुसन्धानं — Daily reading of devotional works

प्राणदेवः — God of life

विश्वासः — Faith

सत्यमार्गः — Path of truth

परमतखण्डनं — Criticism of other religion

स्वमतस्थापनं — Establishment of own religion

मूलानि — Sources

प्रकाण्डः — Trunk

शाखोपशाखाः — Branches

जीवः – — Soul

ईश्वरः — God

भेदसिद्धान्त. — Theory of dualism

मोक्षः — Salvation

अवतारः — Incarnation

पाठः - 6

स्वातन्त्र्य समरः — Struggle for Independence

राजनैतिकः — Political

वैदुष्यः — Profound Knowledge

उन्नत विद्याभ्यासः — Higher Studies

ऐच्छिक विषयः – Optional Subjects

विचारणधारा — Srteam of thoughts

जनबाहुल्ये — In majority

कुत्सुतनीतिः — Wretched policy

परिणामतः — Consequently

अभियोगः — Allegation

अरुन्तुदं — Torturing

अन्तरात्मा — Consciousness

निर्भीकता — Dareness

कर्तव्यपालनं — Discharging of duty

विद्यासक्तिः — Interest in Education

देशभक्तिः — Patriotism

पाठः – 7

प्रगतिः — Progress

कृतयः — works

कालः — Arts

श्रुतयः — Vedas

स्मृतयः — Smruthis

पुराणानि — Mythology

संस्कृतसाहितिकं — Sanskrit Literature

पाठः — 8

वैज्ञानिकः — Scientist

आध्यात्मिकः — Philosphical

कविता जगति:—In the world of Poetry

भौतिकविज्ञानं — physics

विशिष्टश्रेणी — Distlon- guished rank

प्रतिस्पर्धा — Competition

शोधन — Research

शक्ति-परिवर्तनं—Conversion of energy

वर्ण चित्रम् — Spectrum

प्रभावः — Effect

पाठः - 9

अनन्तशक्तिशालिनी — Im - mnesely powerful

पवित्रः — Sacked

अनर्घः — Precious

प्रतारकः - Deceiver

जाठः – 10

भूषणं — Ornament

लोकस्थितिः - World of affairs

आर्जवम् - Strght - for wardness

धृष्टता — Pride

मकः — Dumb

भीरुः — Coward

मुक्ता — Pride

व्यालः — Serpant

शीलं — Character

वाक्पटुता: - Eloquency

विक्रमः — Chivalry



